A.C. Joshi Library
P.U. Chandigarh

MSS No. 143 Subject Language

Name of MSS व्युत्पत्तिवाद Vyutpattivāda

Author - -

Period - - Folios 91

Script Sanskrit Source Prithipal Singh

Missing Folios - -

143

Sanskrit
482
V998

143-Ms.

143

व्यु॰ १

ॐश्रीगणेशायनमः श्रीसरस्वत्यैनमः शाब्दबोधेचेति सप्तमीनिरूपितत्वेचशाब्दः प्र
सिद्धोयएकपदार्थेघटेसप्तमीअनुयोगित्वे अपरपदार्थस्य नीलपदार्थस्यषष्ठीप्रतियो
गित्वे संसर्गोऽभेदादिः संबंधमर्यादासमभिव्याहारज्ञानकार्यतावच्छेदककोटिप्रवि
ष्टसंबंधतानिरूपितत्वात्तृतीयोऽभेदेभासतेइत्यत्रभासनंविषयता आख्यातार्थः आश्रयता त
थाचघटरूपैकपदार्थानुयोगिकः नीलरूपापरपदार्थप्रतियोगिकोऽभेदादिः
संसर्गः शाब्दबोधनिरूपितसंसर्गतावाभिन्नविषयताश्रयइतिवाक्यार्थः एकत्वमप
रत्वंचनपदेन्वेति अन्यथाख्यातार्थकृतिनिवर्तमानत्वायोः परस्परमन्वयोनस्यात् ना
प्यर्थेनीलोघटइत्यादावभेदान्वयोनस्यात् नीलघटयोरेकत्वात् अपितुपदार्थता
वच्छेदकेनतथाचैकंयत्पदार्थतावच्छेदकंतदवच्छिन्नेयत्पदावपरंतत्पदार्थतावच्छेद
कंनीलत्वादितदवच्छिन्ननीलादेरभेदाद्यन्वयइत्यर्थः पदाद्युपस्थापितार्थस्यैवप्रका
रतयाविशेष्यतयाचभानोपगमेननीलोघटइत्यादौनीलरूपाश्रयप्रकारकाभे
दसंसर्गकघटविशेष्यकशाब्दबुद्धित्वावच्छिन्नेप्रतिप्रथमांतनीलपदसमभिव्याहृ

राम
१

तत्प्रथमांतघटपदेनोपस्थितित्वेनसमभिव्याहाररूपाकांक्षातात्पर्यकारणता एवं
घटमानयेत्यादौघटप्रकारककर्मताविशेष्यकआधेयतासंसर्गकशाब्दबोधेघटप
दाव्यवहितोत्तराम्पदजन्योपस्थितित्वेनसमभिव्याहाररूपाकांक्षातात्पर्यकारण
तांगीकारादितिभावः सचसंसर्गश्चक्वचिदभेदः नीलोघटइत्यादौक्वचित्तदतिरि
क्तएवेत्यादिः घटमित्यादौकर्मत्वघटादेराधारतानिरूपितकर्मत्वनिष्ठाधेयता
संबंधः घटोनास्तीत्यादौनञर्थाभावेघटनिष्ठप्रतियोगितानिरूपितानुयोगि
तासंबंधः घटंदित्सतीत्यादौसनर्थेच्छायांदानधात्वर्थस्यविषयतानिरूपि
तविषयितासंबंधः विषयविषयिभावादिरित्यादिनापचतीत्यादौआख्यातार्थ
कृतौधात्वर्थपाकादेर्जन्यतानिरूपितजनकत्वादिपरिग्रहः व्याससमासभेदे
नविकल्पमाहअभेदश्चेत्यादिना स्वसमानविभक्तिकेन स्वविशेष्यवाचकंघ
टादिपदेनसमानविभक्तिकेप्रथमान्तेनीलादिपदेतेनोपस्थितस्यैवनीलादि
रूपार्थस्याभेदःसंसर्गः व्यासेतन्निमित्तमसमासेनाह स्वाव्यवहितपूर्व

सु.
२

वर्त्तिनावेति स्वविशेष्यवाचकं घटादिपदं तदव्यवहितपूर्ववर्त्तिनानीलादिपदेनेत्य
र्थः उपस्थितस्यैवेत्येवकारव्यवच्छेद्यमाहनान्वितेति नीलस्य घटइत्यत्र नीलपदार्थस्य
समानविभक्तिकपदेन षष्ठ्यासमवधानात् अव्यवहितपदेन वाऽन्वयस्याव्युत्पन्नत्वादि
तिभावः नीलस्य घटइत्यत्र तु नीलपदोत्तरषष्ठ्यां घटपदाव्यवहितपूर्ववृत्तित्वेपि स्व
योग्यत्वात् षष्ठ्यर्थसंबंधस्याभेदेन घटेऽन्वयः ननु स्वसमानविभक्तिकेनेत्यत्र स्वविशे
ष्यवाचकं पदं तेन स्वेन समानाविभक्तिर्यस्येति विग्रहात् समतुल्यविभक्तिकत्वं विशे
षणपदे लभ्यते तत्र बाध्यते विशेष्यपदस्य प्रातिपदिकत्वाद्विभक्तेश्च तद्भिन्नत्वात्
अतः स्वसमानविभक्तिकत्वं परिष्करोति स्वसमानविभक्तिकत्वं चेति स्वसमानत्व
न तुल्यत्वमपि तु स्वपदलक्षणघटस्वप्रकृतिकविभक्तितुल्यत्वमेव च स्वविशेष्यवाच
कपदे प्रकृतिर्यस्याः ईदृशीया प्रथमादिकविभक्तिः प्रथमात्वादिना तत्सजातीया वि
भक्तिर्यस्य तत्त्वं स्वप्रकृतिकविभक्तिसजातीयविभक्तिकविशेषणपदत्वं विशेष्य
वाचकपदोत्तरविभक्तिवृत्तिविभक्तिविभाजकप्रथमात्वादिमद्विभक्तिप्रकृतित्वमि

राम.
२

तियावत् न तु समानानुपूर्वीकत्वं सामानात्यमिति न तु विशेष्यवाचकपदोत्तरविभक्ति
वृत्तित्वमुकारत्वरूपमकारोत्तरत्वं तद्रूपानुपूर्वी विशेषवत्वं विशेषणवाचकपदोत्तरविभक्ति
निष्ठमित्यर्थः वेदाः प्रमाणं शान्ता ब्राह्मणा इत्यादावन्वयबोधानुपपत्तेरिति जातिस्त
त्वद्रूपायाः सविभक्तेः मत्वरूपायाश्चानुपूर्व्या भेदात् सामानात्यनस्यात् प्रथमात्वादि
नासामानात्यमस्तीति नान्वयबोधानुपपत्तिरिति भावः यद्विशेष्यवृत्ति यत्ते लिंगसंख्या
विभक्तयः प्रायस्तापकत्वं तथा समानार्थविशेषणेष्विति भट्टोद्दरिकारिकामर्थतोऽनु
वदन्नाशंकते ननु विशेष्यायाः इत्यादिना कारिकास्थप्रायःपदार्थमाह प्रसक्तविशे
षानुशासने इति विशेष्यायाः सद्देकत्वरत्यादिविशेषणानुशासनस्थले तु न विशेषण
विशेष्यपदयोः समानलिंगसंख्यानियमः समानविभक्तेर्नियमस्त्वस्तीति प्राय इ
त्युक्तमिति भावः समानवचनत्वमित्यत्र वचनं संख्याऽन्यथा विशेष्यविशेषणपदयोः
समानवचनकत्वनियमाभावेन यथानियमोपगमेन समानवचनकत्वनियमे गीका
रेण प्रमाणमित्यस[illegible]ल्पेऽन तत्वेन नित्यनपुंसकत्वादनन्दलिंगतया वेदा इत्यस्य

रौ॰नि॰
३

वाभिन्नलिंगत्वात्समानवचनकत्वाभावेन दोषायेत्याशयः शक्तिर्निपुणता लोका
शास्त्रकाव्याद्यवेक्षणात् काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे इति काव्यप्रकाशका
रिका तत्र शक्तिः कवित्वबीजभूतः संस्कारविशेषः स च वासनात्मा जन्मांतरीय ऐ
ह्लिको वा काव्यलोकशास्त्रादिज्ञानजन्या निपुणता कविशिक्षयाभ्यासश्चेति त्रयः
समुदिताः समुदितानां दंडचक्रादिन्यायेन फलोपधायकत्वेन हेतुरित्येकवचनं तत्र
त्रयः हेतुरिति समानलिंगत्वेपि वचनैक्याभावान्नियमभंग इति भावः तादृशस्थले
असमानलिंगकस्थले आपः स्त्रीभूम्नीत्यादिवल्लवद्बाधकायोगे नियमः तस्मात् उत्स
र्गात्सामान्यौत्सर्गिकमेकवचनमेव विशेषणपदोत्तरमुचितमिति प्रत्यक्षानुमानोपमा
नशब्दाः प्रमाणानि पितरो देवता इत्यादेरनुपपत्तिरिति पितृपितामहप्रपितामहेषु
पितर इति प्रयोगस्तु सपिंडीकरणोत्तरश्राद्धजन्यफलभाक्त्वपारिभाषिकं पितृत्व
मादाय समर्थनीयः इदं त्यागोद्देश्यत्वं च देवतात्वं न तु समानलिंगकस्थले समा
नवचनकत्वनियमांगीकारेण त्रयः समुदिता हेतुरित्यत्रानुपपत्तिसंभवोपि असमा

राम
३

नलिंगकस्यलेन किंचिन्नियतं निमित्तमिति कथं प्रमाणानीत्यत्र बहुवचनानुपप
त्तिः शंकितेति चेन्न बहुवचनप्रयोगे हि क्वचिन्नियमो नियामको यथा नीलाः घटाः
इत्यत्र समानलिंगकसमानवचनकत्वरूपः क्वचिच्च बहुत्वसंख्याबोधः यथाघ
टानित्यत्र प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीत्यत्र तूभयविधहेत्वभावान्न
प्रथमोपस्थितत्वाच्चैकवचनप्रयोगस्यैवभावाख्यातवत्साधुत्वात् विशेषण
पदोत्तरवचनेष्वनुगतं निमित्तमाह यत्रेति ननु घटा नीलाः इत्यत्र विभक्त्यर्थः संख्या
रूपः नीलावर्णा इत्यादौ तु गुणे गुणानंगीकारात् अपेक्षाबुद्धिविशेषविषयत्वरू
पएव विभक्त्यर्थो न तु संख्यारूपः इति शंकालक्ष्यसाधारणं विभक्त्यर्थमाह विशेष्य
वाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्याया विवक्षितत्वमिति त
थाच नियमशरीरे न संख्यात्वेन वाऽपेक्षाबुद्धिविशेषविषयत्वेन वा विभक्त्यर्थस्य निवेशः
किंतु विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयत्वेनेति नाननुगम इति भावः घ
टा नीलाः इत्यादौ विशेष्यवाचके घटपदे तदुत्तरजस्रूपप्रथमाविभक्तिस्तत्तात्पर्य

गो॰
सू॰
५

६

विषयीभूतावहुत्वसंख्यातनोविरुद्धाएकत्वसंख्यातस्मात्ः विशेषणपदोत्तरविभक्त्याश्र
विवक्षितत्वमेवविशेष्यविशेषणपदयोः समानविभक्तिकत्वेनियामकमित्यर्थः अ
तएवेतिनिर्दिष्टशास्त्रविषमांगीकारादेव पुरूरवोमाद्रवसौविश्वेदेवाइत्यत्रविश्वेदेवाइतिविशे
ष्यवाचकेपदेतदुत्तरविभक्तितात्पर्यविषयसंख्यावहुत्वसंख्यातादृशसंख्याद्वित
रूपासापुरूरवोमाद्रवसावित्यत्रविवक्षितेवेतिनसमानवचनत्वं विश्वेदेवानांवहुत्वेपि
द्वित्वविशिष्टयोरेवपुरूरवोमाद्रवसोरेवंकालकामयोस्तत्रतत्रकर्मणिपूज्यत्वविधा
नादितिभावः अभ्यस्तयोरितिप्रभृतिग्रहणंविशेष्यवाचकविश्वेदेवपुरूरवोमाद्रव
सोरेवंकालकामयोस्तत्रतत्रकर्मणिपूज्यत्वविधानादितिभावः अभ्यस्तयोरितिप्रभृ
तिग्रहणंविशेष्यवाचकविश्वेदेवपदोत्तरविभक्तितात्पर्यविषयवहुत्वसंख्यायाश्च
न्वययोग्यत्वंसूचयतिविश्वेदेवानांवहुत्वात् तथाहि इदमद्भिरिहितास्त्येष्ठाविधाना
ममहातथाः तस्याः प्रजाः समुत्पन्नाविश्वेदेवास्त्रयोदश नैमित्तिककालकामौका
म्यौचधूरिलोचनौ माल्यष्टकौदिविदेवौनाद्यौमत्स्यवसूस्मृतौ पुरूरवोमाद्रवसौपा

राम॰
५

वैरोमस्मदाहृतौ यत्तेदत्त्वकत्वनाकमदः सापिंङ्क्तकेविधाविति इदमेवंग्रनत्वेकार्य्यायाहि
तथाकृत्वगणावच्छेदेनकार्याधिकरणाहृत्यभावप्रतियोगित्वेनसकलशब्देषुचालनी
न्यायेनप्रतियोगित्वादतः तादृशप्रतियोगितानवच्छेदकशब्दत्वरूपधर्मवत्त्वमेवशा
ब्दार्थयंप्रतिकारणत्वंवाच्यंतच्चशब्दत्वमेवेत्याह शब्दत्वावच्छिन्नेयावच्छेदानिष्ट
मेकमेवेति यदिचशब्दत्वमेवकारणत्वेतदाकारणतावच्छेदकत्वंशब्दत्वेनसंभव
तिस्वभेदः वच्छेद्यावच्छेदकभावानंगीकारात् तथापितादृशप्रतियोगितानवच्छे
दकत्वविशिष्टशब्दत्वस्यकारणत्वेस्वरूपतः शब्दत्वस्यकारणतावच्छेदकत्वमिति
नानुपपत्तिः संपन्नोव्रीहिरित्यनेकव्रीहितात्पर्यकेपिपदेतादृशव्युत्पत्तिसंकोच
स्येति एकत्वपदार्थेवच्छेदकेव्रीहित्वेऽन्वेति तथाचैकव्रीहित्वनात्यवच्छिन्नः दे
श्यः सर्वोव्रीहिः संपन्नः परिपक्व इत्यर्थः तादृशव्युत्पत्तिसंकोचस्य पदार्थेनान्वे
तिनतत्पदार्थैकदेशेनेतिव्युत्पत्तिसंकोचस्य पदार्थः पदजन्यप्रतीतिविशेष्यः प
दार्थेनपदजन्यप्रतीतिविशेषेणान्वेति तथाचपकृपदार्थविशेष्यकापरपदार्थ

मु०
५

प्रकारकशाब्दबोधं प्रति समानविशेष्यताप्रत्यासत्त्या पदजन्यपदार्थोपस्थितिर्हेतुः क्वचि
द्वैद्याः प्रमाणमित्यादावनुभवानुरोधेन विशेष्यतया एकत्वादिपदार्थप्रकारकबोधवि
शेष्यतया प्रमाणादिपदजन्यपदार्थोपस्थितिर्हेतुः व्यभिचारवारणाय स्वाव्यवहितोत्त
रत्वसंबंधेन कारणवैशिष्ट्यनिवेशो बोध्यः एकदेशान्वयपरिहारायेति यदि चेति स्वाश्र
यप्रकृत्यर्थतावच्छेदकवत्त्वसंबंधेन प्रकृत्यर्थ एवान्वय इति स्वव्रीहिपदोत्तरप्रथमा
र्थैकत्वस्वाश्रयीभूतयत्प्रकृत्यर्थतावच्छेदकव्रीहित्वं तद्वत्त्वं तेन संबंधेन व्रीहावे
वैकत्वान्वयो न तु प्रकृत्यर्थतावच्छेदके व्रीहित्वे तेन न तत्त्वापातिसंकोच इति भावः उ
क्तसंबंधेनैकत्वविशिष्टो व्रीहिरित्यन्वयबोधः प्रकृत्यर्थतावच्छेदके एकत्वान्वयो न भ
वतीत्यत्र हेतुमाह व्रीहित्वादिना तैः स्वरूपत एव व्रीह्यादिपदशक्यतावच्छेदकतयाः
न्वयितावच्छेदकतयावच्छेदकतावच्छेदकरूपेणानुपस्थितेरितीदं तत्र व्रीहित्वे पदार्थो
तरस्यान्वयानुपपत्तेरित्यत्र हेतुत्वेनान्वेति क्वचित्तु अन्यापितावच्छेदकरूपेणानुपस्थि
तेरिति समस्यन्त पाठः अनुपस्थितेस्तत्र व्रीहित्वे इत्यत्र हेतुगर्भविशेषणं प्रकृतैवगाति

राम०
५

व्रीहित्वेव

रिति वेदाः प्रमेयाणामित्यत्रैकत्वाश्रयप्रमाणतावत्संबंधेनैकत्वविशिष्टं यत्प्रमाणं तदभि
न्नावेदाः इत्यर्थः शाब्दबोधमात्रे धर्मितावच्छेदकरूपेण धर्म्युपस्थितेर्हेतुत्वादिति भावः
यत्किंचित्पदार्थतावच्छेदकेत्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वसंबंधेन पदार्थे चेतिपद
द्वयोपि जातेरेकत्वभानोपगमो निरर्थक इत्यर्थः यतः स्वसजातीयनिष्ठभेदप्रतियोगि
तानवच्छेदकत्वरूपसजातीयद्वितीयरहितत्वैकवचनार्थ इति भ्रमः नत्वेकत्वं स्वसत्वदशा
यां घटत्वं घट इत्यादौ स्वप्रकृत्यर्थः यतद्देशस्थितिघटः तत्सजातीयः स एव तन्निष्ठः एक
पटादिभेदः तत्प्रतियोगितावच्छेदके तत्पटनिष्ठमेकत्वेस्त्यनवच्छेदके तद्घटनिष्ठमेकत्वं
तदेव सजातीयद्वितीयरहितत्वं च घटपदोत्तरमेकवचनार्थः तद्देशे बहुघटसत्वदशायां
स्वसजातीयोपि घटस्तन्निष्ठैकत्ववद्धेतद्घटभेदः तत्प्रतियोगितावच्छेदकमेव पत
द्घटनिष्ठमेकत्वं एवं स्वसजातीयेतद्घटनिष्ठभेदप्रतियोगितावच्छेदकान्येव एतद्घटभिन्न
निष्ठान्येकत्वानि इत्यनवच्छेदकैकत्वाप्रसिद्ध्या नात्र घट इति प्रयोगः नत्वेकत्वमात्रे नत
संख्यारूपमेकत्वमात्रे नस्यसंख्यारूपमेकत्वमात्रं नस्यसंख्यारूपैकत्वस्य वस्तुमात्र

अं
६

इतित्वेनप्रथ्यंतपदशब्दं विनैवतद्बोधनेशब्दानपेक्षणादिति भावः अनुपयोगाच्चेति
एकवचनांतत्वदादिपदस्यव्याप्तिरेवफलेनतदसंभवाच्चेत्यर्थः ईदृशैकत्वार्थैर एवं भक
माह अतएवेति तादृशैकत्वस्य सजातीयेत्यादिनिरुक्तैकत्वस्य साजात्यंचस्वसमभिव्या
हृतपदार्थसंसर्गित्वविशिष्टप्रकृत्यर्थतावच्छेदकरूपेणेति अत्रचदोषोस्तीत्यत्र स्वमेकव
चनांतत्वदपदंतत्समभिव्याहृतंपदं अत्रेतिपदंतदर्थः एतद्देशवृत्तित्वंतत्संसर्गित्वंतत्सं
सर्गएवसंबंधएतद्देशवृत्तित्वीयस्वरूपसंबंधमहृपस्ताद्विशिष्टंयत्प्रकृत्यर्थतावच्छेदकंघट
त्वंतेनरूपेणसजातीयः सएवघटस्तद्भिन्नोयः एकपदमेदसत्यानियोगितावच्छेदकेन
त्वदनिष्ठैकत्वेतदनवच्छेदकेचघटनिष्ठैकत्वेनरूपपारिभाषिकसजातीयद्वितीयराहित
त्वमेकवचनार्थोघटेस्तिइतिपूर्वमुक्तं एतद्देशावच्छेदकमत्वदशायांतादृशवाक्यप्रयो
गस्तुजात्यैकत्वादेरेवसमर्थनीयइति एतद्देशावच्छेदकसत्वदशायांअत्रघटोस्तीति
प्रयोगोनभवति यदिकदाचिद्भवतितदाघटपदोत्तरप्रथमैकवचनार्थैकत्वेघट
त्वरूपजातावन्वेति तत्रप्रकृत्यर्थतावच्छेदकसंबंधेनसमभिव्याहृतपदार्थसंसर्गि

राम.
६

वृत्तित्वविशिष्टप्रकृत्यर्थतावच्छेदकमात्रवृत्तिधर्मेणासामानाधिकरण्यं ग्राह्यं तथा च घटपदस
मभिव्याहृते घटेतिसमस्यंतपदे तदर्थः एतद्देशवृत्तित्वं तस्य स्वरूपेण संसर्गी घटः त
त्र घटे प्रकृत्यर्थतावच्छेदकतावच्छेदकसंबंधेन समवायेन वृत्तिर्यस्तादृशो घटत्वे
तत्वे तादृशवृत्तित्वं रूपे घटत्वोक्तिर्यथा च प्रकृत्यर्थतावच्छेदकमात्रवृत्तिधर्मो घटत्वे
तदापि घटत्वेऽस्तीति सामानाधिकरण्यसंबंधेन समभिव्याहृतपदार्थसंसर्गिवृत्तित्व
विशिष्टो यः प्रकृत्यर्थतावच्छेदकमात्रवृत्तिधर्मो घटत्वत्वं तेन धर्मेण घटत्वसजा
तीयं घटत्वमेव तन्निष्ठो भेदः एकत्ववत्पटत्वभेदस्तत्प्रतियोगितावच्छेदकं एकत्वा
दि तन्निष्ठमेकत्वं तदनवच्छेदकं घटत्वनिष्ठमेकत्वं तदेव सजातीयद्वितीयरहितत्व
घटपदोत्तरप्रथमैकवचनार्थः नात्येकत्वादेरेवेत्यादिपदान्तराश्रयप्रकृत्यर्थता
वच्छेदकवत्तसंबंधेन एकत्वस्य घटेऽन्वयः स्वघटपदोत्तरप्रथमैकवचनार्थः एक
त्वं तदाश्रयीभूते प्रकृत्यर्थतावच्छेदकं घटत्वं तद्वत्वं च घटेऽस्तीति तदर्थः युक्तं चैत
न घटत्वे एकत्वान्वयो न संभवति घटोऽस्तीत्यत्र घटत्वस्य स्वरूपेणत्र घटपदशा।

यु. ८

कतावच्छेदकतया ऽन्वयितावच्छेदकत्वरूपेणानुपस्थितेः अन्वयितावच्छेदकरूपे
णोपस्थितेरेव पदार्थान्तरान्वयनियमादिति मतांतरमाहुः युष्मदि समाना
धिकरणे स्थानिन्यपि मध्यमः इति पाणिनिसूत्रे युष्मत्पदेन तिङ्वाच्यकारकवाचिनि
प्रयुज्यमाने सति स्थानिनि गम्यमाने वा सति मध्यमः पुरुषः प्रयुक्ते गम्यमाने वाऽके
युष्मदि मध्यम इति हर्युक्तेः एवमस्मदीत्यस्य शेषे प्रथम इत्यस्य चार्थ इति वैयाकरण
मतेपि भावाख्यातप्रयोगे न प्राप्नोति कर्तृकर्मकारकाणां तिङ्वाच्यत्वाभावात्
एवं न्यायनयेपि भावप्रधाननिर्देशेन प्रयुक्तगम्यमानान्यतरयुष्मत्पदबोध्यनिष्ठ
युष्मत्वेतिऽर्थे संख्यासमानाधिकरणे सति मध्यमः पुरुष इत्यर्थकरणात्तु वर्तमान
त्वाद्यर्थकभावाख्यातस्यावश्यकत्वेपि भावनान्वयिनि संख्यान्वयनियमेनाभाव
नान्वयविरहेण संख्यान्वयविरहादाह एकत्वाविवक्षायामधीत्यादिः अत्रेनात्ये

३ कत्वपरतया तत्समर्थनेन एकत्वसमर्थनेनेत्यर्थः प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थ रामः
बोधकतानियमभंगापत्तेरिति भावः दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमभिप्रेत्य समाध

ते भावाख्यातस्य लेगत्यंतरविरहेणाविभक्तेर्निरर्थकत्वापगमादिति भावाख्यात
स्य ले सुप्यते इत्यादौ स्वार्थे विभक्त्यर्थः एकत्वं विशेषणीभवत्कर्मे न च स्वार्थत्वव्याप्या
नो हि कर्तृकस्वापबहुकर्तृकस्वापत्वानोव्याप्तेनार्थमेव वक्तव्यं तत्र न संभवति
स्वापत्वव्याप्यधर्मोणोव्याहत्यानोकदाप्यनवगमात एकत्वं विशेषणं स्वार्थमि
ति भावाख्यातस्य संख्यार्थो नास्तीत्यर्थः सुप्यते इत्येतावन्मात्रेणैव तः कतिप
यैरिति प्रश्नासंगतेश्च न संख्याविभक्त्यर्थः तथाहि सुप्यते इत्यत्राख्यातार्थैकत्वस्य
धात्वर्थस्वार्थेः न्वयांगीकारे एकः स्वाप इत्यन्वयबोधाच्चमत्नैकस्मिन्स्वापे सिद्धाना
स्य वाक्छिन्नमनोयोगरूपे कतिपयैरिति जिज्ञासाविषयबहुत्वनिष्ठकृतिनन्वयत्ववाध
त इति कतिपयैरिति प्रश्नासंगतिः एवं स्वार्थे द्वित्वबहुत्वयोरप्यसंभवात्सुप्यते
सुप्येते इति द्विबहुवचनापत्तिरपि इष्टव्यातस्मात्संख्यार्थाभावेन स्वापत्वरूपेण
धात्वर्थस्यापि तेस्वापे त्वतीयांतार्थस्यापि एकत्वेनोन्नतीयार्थकृतिद्वाराः न्वया
भ्युपगमात उक्तप्रश्नसंगतिरुपपद्यते इति भावाख्यातस्य ले सुप्यते इत्येतावन्मा

श्रु॰
८

गैत्के केन काप्यांकैरित्यनेकश्रोतृनित्ता या बोधके पदैर्विभिन्नविभक्तिकैः संख्याबो
धकस्य श्रोतृगतताभावस्याभिव्यंजनात्तद्बोधस्यानुभवबाधितत्वादिति गुरवस्तदर्थ
श्चानेकविषयिणी या श्रोतृवृत्तिता तत्तद्बोधकैरेकद्विवचनांतैः पदैः श्रोतृगतताभा
वस्य स्वापत्वव्याप्यधर्माणां द्विबहुकर्तृकस्वापत्वानां स्वायान्विततिङ॰र्थैकत्वव्याव
र्त्यानां कदाप्यनवगमाभावस्य द्विबहुकर्तृकस्वापावगमद्रूपस्य स्वापान्वितताख्याता
र्थैकत्वसंख्याबोधकस्याभिव्यंजनादित्यन्वयस्तथा हि यावर्थस्वापे भिद्रानास्वा
श्चिन्नात्ममनोयोगाद्रूपे ख्याख्यातार्थैकत्वान्वयप्रकारिन्नस्वापे एककर्तृकत्वमेवा
स्ति न द्विबहुकर्तृकत्वमिति व्यावर्त्यमेव द्विबहुकर्तृकत्वे व्यावर्तके स्वापनिष्ठमेक
त्वं व्यंजयति इति स्वापत्वव्याप्यधर्माणां द्विबहुकर्तृकस्वापत्वानां अवगमप्रश्रोतृ
गतताभावरूपाख्यातार्थैकत्वसंख्याबोधक इत्यर्थः तद्बोधस्य द्विबहुकर्तृकस्वापबोधस्या
नुभवबाधितत्वादिति व्यावर्त्यानामेकत्वव्यंजकानामभावान्नसंख्याभावाख्यातार्थ
इत्यर्थः संभवत्यर्थसाधुत्वे पदसाधुत्वमन्याप्यमित्यभिप्रेत्याह अत्रचेति अत्रचसंपन्नो

राम
८

व्रीहिरित्यादौ तु व्रीहियदोत्तरप्रथमार्थैकत्वस्य व्रीहित्वेऽन्वयसंभवे सति तात्पर्ये
एकत्ववतः यद्व्रीहित्वं तदवच्छिन्नः सर्वोऽपि व्रीहिः संपन्न इति बोधस्यानुभवसिद्धत्वा
देवेत्यर्थः ननु प्रसक्तिविशेषानुशासनेन विशेष्यविशेषणवाचकपदयोः समान
वचनत्वमिति नियमस्य समानलिंगकस्यैवाभ्युपगमेन वेदाः प्रमाणमित्या
द्यनुपपत्तिवारणेऽपि त्रयः समर्दिता हेतव इति काव्यप्रकाशव्याख्यायां प्रसंगाति
देशीवेवेत्यत आह एवं त्रयः समर्दिता हेतव इत्यत्रेति अत्र विशेष्यवाचके त्रय इति प
दे तदुत्तरं समस्तरूपविभक्तेस्तात्पर्यविषयीभूतं बहुत्वसंख्यातद्विरुद्धासंख्यापक
त्वरूपा साच हेतवपदोत्तरप्रथमैकवचनेन विवक्षितैवेति अविवक्षितत्वाभावात्
त्रिपदस्य बहुवचनान्तत्वेऽपि हेतुपदस्यैकवचनान्ततोपपत्तिः एवं च एकत्ववि
शिष्टं यत्कार्योत्पादकयोग्यकत्वावच्छेदकसमुदायत्वं तद्धेनैव यत् इति बोधः अत
एवाति समुदायत्वेकत्वं योगीकारादेवेत्यर्थः तथा सति तृणारणीमणीन्याये
न तृणादीनां कारणत्वं योगीकारे स्मिन्पक्षे प्रामाणिकलौकिकशास्त्रकार्यकारणभावेन

मु: ५

णाजन्यानिष्टगणानां कार्यतावच्छेदकत्वशिष्टापूर्वकाभ्यामसप्रयुक्तानामित्यर्थः एकैकमसमवधान
दशायामपि एषांमध्ये केवलशक्त्यादिना कार्यंत्वग्नेः शक्तित्वादिकमेव कार्यो
त्पादप्रयोजकतावच्छेदकेन तच्छक्त्यादि त्रितयपर्याप्तसमुदायत्वमिति तेषांश
क्त्यादीनां कार्योत्पादप्रयोजकतावच्छेदकसमुदायत्वाश्रयत्वानुपपत्तिरित्यर्थः
एवं च। जात्याकृतिव्यक्तयः पदार्थ इत्यत्रेति विशेष्यवाचके पदे जात्याकृतिव्यक्तय

८

इतिपदे तेरा विभक्तिर्न सा विभक्तिस्तत्तात्पर्यविषयीभूता संख्या बहुत्वसंख्या त।
तोविरुद्धैकत्वरूपा संख्या सा विशेषणवाचकपदार्थैकदेशेऽन्वयप्रयोज्यमया विव
क्षितैवेति न विशेष्यविशेषणपदयोः समानवचनत्वमिति एवं च एकत्वविशि
ष्टपदशक्तिरूपेपदार्थत्वेन तद्वत्यः जात्याकृतिव्यक्तयः इति बोधः एवं च समानलि
ङ्गकस्थले विशेष्यवाचकपदासमानवचनस्यापि विशेषणवाचकपदस्य साधु
त्वं च समानलिङ्गस्थले औत्सर्गिकमेव सर्वत्र विशेषणपदानां तत्रप्रयोक्तुमावि
तमिति। प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि पितरो देवता इत्यादेरनुपप

एम: ५

त्तिं वारयति एवं प्रत्यक्षानुमानेत्यादिना टिरीति शालाभ्भातरपक्षाः स्वा
मिनो देहृदेवराविस्यत्र शफलपदस्य बहुवचनान्तत्वस्य भ्रातृपदस्य बहुवचनान्तत्वे
पि देहृदेवरपदस्य द्विवचनान्तत्वोपपादनमिति अत्र विशेष्यवाचकपदस्याभिभ्रा
तरइतिपदे तदुत्तरान्त्यस्य विभक्तेस्तन्नात्पर्यविषयीभूतावहुत्वसंख्यानद्विरु
द्वा संख्या द्वित्वसंख्योत्मा देहृदेवरपदोत्तरश्यो विभक्त्याविवक्षितेवेति अविवक्षि
तत्वाभावाद्देहृदेवरपदे द्विवचनान्तता अत्र देहृदेवरपदस्य देहृदेवरपदवाच्यल
लणान्नेनवाच्यतावच्छेदकयोर्देहृदेवरपदयोर्द्वित्वान्वयः पदरूपदार्थेनावच्छे
दकभेदस्यत्वाद्देहृदेवराविस्यत्र द्वंद्वापिरपपद्यते दार्थसंदर्शमित्यत्र स्वाविशेष्यवाच
केपदे दार्थपदे तदुत्तरत्वेन प्रतिसंधीयमानाविभक्तिः स्वविभक्तिः सप्तम्यन्त्यादि
नान्तत्वसजातीयाविभक्तिर्यस्येति तत्वे तु दरपदे श्यमेवाद्याकोद्वाकोष्ठा इत्यर्थः
एवं इदंदर्थीत्यादौ विशेष्यवाचकपदोत्तरत्वेन प्रतिसंधीयमानाविभक्तिसजा
तीयविभक्तिकत्वमपि तत्याविधयविभक्त्यवच्छिन्नतत्पूर्ववर्तितयाप्रतिसंधीयमा

३

ॐ. व्यु.
१

नत्वमिति विशेष्यवाचकेऽइदमितिपदे तदुत्तरविभक्तिः सुविभक्तिः प्रथमा
त्वादिना तत्सजातीया विशेषणवाचकपदोत्तरत्वेन प्रतिसंधीयमाना विभ
क्तिर्यस्य तत्त्वे विशेषणवाचके दाधिपदेऽस्ति शंकते अथेति सामग्र्याका
र्यजनकत्वे आकांक्षायोग्यतारूप प्रयोजनकत्वे प्रतिबंधकत्वादित्यर्थः समा
धत्ते तथाविधान्वयबोधोपधायिकाकांक्षाविरहादिति नीलप्रकारकाभेद
संसर्गकघटविशेष्यकान्वयबोधजनिकायाः विशेष्यविशेषणपदयोः स
मानत्वरूपायाः आकांक्षाया अभावादित्यर्थः विनिगमनाभावादाह समा
सस्थले चेति उक्तस्थले नीलघटः इति स्थले इत्यत्र च समासे व्यासे चोक्ताकांक्षा
विरहान्न नीलप्रकारकाभेदसंसर्गकघटविशेष्यकबोधापत्तिरित्यर्थः उ
क्ताकांक्षाज्ञानयोरिति समासस्थलीयोक्ताकांक्षाज्ञानयोरित्यर्थः पत्विति
समासव्याससाधारणे विशेषणवाचकपदस्य विशेष्यवाचकपदाप्रकृतित्व
स्वरूपे विरुद्धविभक्तिराहित्यमेव तादृशान्वयबोधोपधायिकाकांक्षा विशेष्य

गम.
१०

वाचकपदनिष्ठविशेषणवाचकपदाप्रकृतिकविभक्त्यप्रकृतिकत्वं तन्न तथा
नीलघटमानयेत्यादावसंभवादिति नीलो घटइत्यत्र विशेषणवाचकपदाप्र
कृतिकविभक्त्यप्रकृतिकत्वं तन्न तथा नीलघटमानयेत्यादावसंभवादिति नी
लो घटइत्यत्र विशेष्यवाचकेपदे घटपदे तदप्रकृतिकाया विभक्तेर्द्वितीयादि
विभक्तेस्तदप्रकृतित्वेन तु विशेषणवाचकपदे नीलेऽसि एवं नीलघटइत्यत्रा
पि तथाहि विशेष्यवाचके घटादिपदे तदप्रकृतिका विभक्तिर्द्वितीया तदप्रकृ
तित्वेन नीलपदेऽस्ति विरुद्धविभक्तिराहित्यमेवं समासव्याससाधारणी नीला
दिप्रकारकाभेदसंसर्गकघटविशेष्यकान्वयबोधजनिकाऽऽकाङ्क्षा नीलस्य
घटइत्यादौ तु विशेष्यवाचकघटपदाप्रकृतिका विभक्तिः षष्ठीविभक्तिस्तदप्र
कृतित्वमेव नीलपदे तेन नीलस्य घटइति वाक्यात् नीलप्रकारकाभेदसंसर्गक
घटविशेष्यकशाब्दबोधः विशेष्यवाचकपदनिष्ठविशेषणवाचकपदाप्रकृ
तिकविभक्त्यप्रकृतित्वरूपाकाङ्क्षाया नीलो घटइत्यत्र विशेषणवाचके पदे नी

श्रु॰
११

लपदे तदप्रकृतिका विभक्तिर्द्वितीयादिविभक्तिस्तदप्रकृतित्वे विशेष्यवाचकपदे
घटपदे इति नीलो घटः इत्यादौ सत्वेऽपि नीलघटमानयेत्यादौ तदभावात् तेन विशेष्य
वाचकपदनिष्ठविशेषणवाचकपदाप्रकृतित्वस्य विनिगमनाविरहेणाकां
क्षात्वमित्यर्थः न च नीलघटः इति समस्ते विग्रहाय नीलघटमानयेत्यादिसमस
स्तानुसरणे किं बीजमिति वाच्यं तत्र विशेषणवाचकपदाप्रकृतिकेत्यस्य वि
शेषणवाचकपदोत्तरत्वेनाप्रतिसंधीयमानेत्यर्थकरणेन दोषस्तथाहि नी
लघटः इत्यत्र विशेषणवाचके पदे नीलपदे तदुत्तरत्वेनाप्रतिसंधीयमानाया
विभक्तिर्द्वितीयाविभक्तिरेव न तु प्रथमाविभक्तिस्तदप्रकृतित्वं विशेष्यवाच
कपदे घटपदे इति न दोषः इत्याशयेन नीलघटः इति समस्तमुपेक्षितवान् न च
नीलघटमानयेत्यत्रापि नीलं च तत् घटं चेति परिनिष्ठितविभक्त्या समासाश्रय
णान्न दोषः इति वाच्यं प्रथमांतेन समासः इत्यभिप्रायेण दोषाभिधानात् इति
तदसत् विशेष्यवाचकपदाप्रकृतिकत्वे विशेष्यवाचकपदानुत्तरत्वे वा।

स॰म॰
११

शेष्यवाचकपदोत्तरत्वेनाप्रतिसंधीयमानत्वमिति वा तथा च विशेष्यवाचकपदा
नुत्तरविभक्त्यप्रकृतित्वरूपं श्रूयवा विशेष्यवाचकपदोत्तरत्वेनाप्रतिसंधीयमानवि ३
भक्त्यप्रकृतित्वरूपं वा विरुद्धविभक्तिराहित्यमेवाकांक्षा सा नीलोत्पलद इत्यादौ न सं
भवति तथा च विशेष्यवाचकपदे उत्पलपदे तदनुत्तरा विभक्तिः सुविभक्तिस्तत्प्रकृ
तित्वमेव विशेषणवाचकपदे नीलपदे इति नीलपदोत्तरविभक्तेरुत्पलपदानुत्तरवि
भक्त्याभिन्नत्वादित्यर्थः शंकते श्रूयविशेष्यवाचकपदोत्तराश्रुतिविभक्तिविभा
जकधर्मवद्विभक्तिराहित्यस्य विवक्षणान्नदोष इति चेदिति नीलोत्पलं इत्यत्र वि
शेष्यवाचकउत्पलपदे तदुत्तरा यस्मिन्श्रुतिर्या विभक्तिविभाजको धर्मो द्वितीयात्वादि
तद्वद्विभक्तिरहितत्वस्य नीलपदे सत्वात् एवं नीलोत्पलं इत्यत्र विशेष्यवाचके
पदे तदुत्तरा यस्मिन्वर्तमानो योधर्मो द्वितीयात्वादिस्तद्वद्विभक्तिराहित्यस्य नीलपदे
सत्वात् एवं नीलोत्पलं इत्यत्र विशेष्यवाचके पदे तदुत्तरा यस्मिन्वर्तमानो यो धर्मो द्वि
तीयात्वादिस्तद्वद्विभक्तिराहित्यस्य नीलपदे सत्त्वे नीलोत्पलः नीलोत्पलं इति द्वया

मु॰
१२

नीलप्रकारकाभेदसंसर्गकघटविशेष्यकबोधः नीलस्य घटस्येत्यादौ तु घटपदोत्त
राष्टीतिधर्मः षष्ठीत्वं तद्विभक्तिराहित्यस्यासत्वान्न तादृशबोधः इत्यर्थः समायते
विभक्तित्वादिकमजानतः पुरुषस्य तादृशधर्मज्ञानासंभवाच्छाब्दबोधानुपप
त्तिरिति यस्य विभक्तित्वज्ञानं नास्ति तस्यापि नीलो घट इति वाक्याच्छाब्दबोधो
जायते स न स्यात् विशेष्यवाचकपदोत्तराष्टीति धर्मज्ञानासंभवादित्यर्थः स्वरू
पतो विरुद्धविभक्तिराहित्यस्य प्रयोजकत्वेन संभवति तथा च नीलो घटः इत्यत्र
यदा तु पदस्यापदत्वभ्रमो जातस्तदाऽभेदान्वयो न जायते स स्यात् न च मतेऽस्व
रूपतो विरुद्धविभक्तिराहित्यरूपकारणसत्वादिति एवं नीलस्य घट इत्यादौ ष
ष्ठ्यामपदत्वभ्रमो जातस्तदानीं नीलस्य घट इत्यत्र वाक्यान्नीलप्रकारकाभेदसंसर्ग
कघटविशेष्यको बोधो जायते स न स्यात् विरुद्धविभक्तिराहित्यस्य स्वरूपतोऽ
भावात् न तु तादृशज्ञानस्यैव प्रयोजकत्वं वाच्यमिति तत्र यस्य विभक्तित्वज्ञाने
नास्ति तस्य बोधो न स्यादिति तदुक्तमेव पूर्वमित्यर्थः विरुद्धविभक्तिराहित्यज्ञा

राम॰
१२

इत्यादिद्विविधबोधसाधा
रणमितितेत्तरस्वादिभिन्न
पद[illegible]पदंतदुत्तरंयत्तद्भिन्नत्व
विशिष्टंयत्स्वोत्तरत्वादि[illegible]त
रूपे[illegible]र्थः यथानीलोघटः

नैदेतत्वपदेपिविभक्तित्वादिकमजानतः शुद्धघस्यशाब्दबोधानुपपत्तिम[illegible]
शंकते अथनीलोघटोनीलघटइत्यत्रनीलपदंतदुत्तरस्वादिभिन्नपदंचघटप
दंतदुत्तरंयत्तद्भिन्नत्वंचघटपदेःथचस्वंनीलपदंतदुत्तरत्वंचघटपदेऽस्ति एवंनील
घटइत्यत्रापिस्वोत्तरंनीलपदोत्तरंस्वादिभिन्नंपदंघटपदंतद्भिन्नत्वंचघटपदेऽस्ति
अथचस्वोत्तरत्वंचनीलपदोत्तरत्वमिति स्वरूपस्याव्यवहितोत्तरत्वसंबंधेननी
लपदवत्तस्याघेतत्वघटपदत्वरूपाकांक्षासमासासमाससाधारणीनीलपदकारका
भेदसंसर्गकघटविशेष्यकबोधजनिकेत्यर्थः अत्रनीलस्यघटइतिप्रयोगावार
णायस्वादिभिन्नेत्यत्रविशेष्यवाचकघटादिपदोत्तरविभक्तिभूतविभक्तिवि
भाजकधर्ममात्रवादिधर्मावच्छिन्नभिन्नेत्यर्थ तथाचनीलपदोत्तरषष्ठ्याः प्र
थमात्वावच्छिन्नाभिन्नत्वान्नदोषः समाधत्तेनीलघटरूपामित्यादिकाकासा
धारणानुरोधेनात्मादृशयाकांक्षायाउपगतत्वात्तयोपदर्शितत्वासमा
ससाधारणानुगतकांक्षानुसरणमस्यप्रयोजनकत्वादिति नीलेचनत्तघटे

पंचेति कर्मधारयस्तत्रोक्ताकांक्षाया असमासे धारिणीनस्संभवति तथाहि स्वनील
पदोत्तरत्वरूपस्याव्यवहितोत्तरत्वसंबंधेन नीलपदवत्त्वं भवति रूपपदे घटश्च च
स्वाधेयं भवति (तथापि स्वनीलपदोत्तरत्वरूपस्याव्यवहितोत्तरत्वसंबंधेन नील
पदवत्त्वं भवति रूपपदे घटश्च च स्वाधेयं भवति) तथापि स्वनीलपदोत्तरत्वरे स्वादिभि
न्नपदे घटपदेतरत्वमेव रूपपदे इति तदनुत्तरत्ववैशिष्ट्यसामानाधिकरण्ये
नस्वोत्तरत्वे नास्तीति नीलघटरूपमित्यादिसाधारण्याय अस्मादृशीयाकांक्षा
उपेतव्या सा च स्वादिभिन्ननिराकांक्षत्वप्रवेशेण बोध्या तथा च स्वोत्तरे नीलप
दोत्तरे स्वादिभिन्ननिराकांक्षपदेतरत्वं यत्तद्यत्तद्भिन्नत्वरूपस्वोत्तरस्वादिभिन्न
पदान्नत्तरत्वमात्रेण घटपदे तत्स्वोत्तरे स्वादिभिन्ननिराकांक्षपदेन भवति किं तु रूप
साकांक्षमेवेति रूपमाकांक्षाया असमासे साधारणी न स्वैत्यर्थः यद्यपि नील
रूपमित्यत्र नीलघटयोरभेदान्वयानुपगमे नीलपदोत्तरे स्वादिभिन्नपदे घटपदे
तदितरयत्तद्यत्पदे रूपपदे तदनन्तरत्वं घटपदेऽस्ति घटश्च स्वोत्तरत्वे नीलपदोत्तरत्व

वि

वास्ति तथापि घटपदे स्वार्थेनत्वेनास्तीति उक्ताकांक्षानास्ति तत्र स्वार्थेन घटादिपदत्व
मित्यस्यानन्वयीयमानस्वार्थेन घटादिपदत्वमितिविवक्षणात प्रकृताकांक्षोपपादने
पि नीलघटरूपमिति वाक्यात् रूपेनीलमन्वेति संशयोच्छेदो ज्ञायते सनस्यादिति
घटपदोत्तरस्वादिविभक्त्यनुसंधानदशायामिति घटपदे स्वार्थेनत्वाभावान्नतानील
घटयोराकांक्षाभावादन्वयोनास्ति किंतु नीलरूपयोरेवाभेदान्वयोवक्तव्यः सोपि नसं
भवति स्वोत्तरं नीलपदोत्तरं यत्स्वादिभिन्नपदं घटपदंतन्नरं रूपपदं स्वोत्तरत्वादिपद
भिन्नपदोत्तरत्वाभाववैशिष्ट्येनास्तीति प्रकृताकांक्षाविलयोपत्तिरिति वोध्यमिति प
गंगाराममगुरुचरणाः नचस्वोत्तरस्वादिभिन्ननिराकांक्षपदानन्तरत्वविशिष्टस्वोत्तरत्व
रूपस्वार्थव्यवहितोत्तरत्वसंबंधेन नीलादिपदवत्स्वार्थेन घटादिपदत्वमेव समासख्या
समभ्याहरणीयाभेदान्वयबोधोपयिकाकांक्षास्त्वितिचेन्न सिद्धांतिमतेतु सकलस
मासेविशेष्यवाचकपदाव्यवहितत्वरूपं वर्तिविशेषणवाचकपदत्वे विशेषणवाच
कपदाव्यवहितोत्तरवर्तिविशेष्यवाचकपदत्वं वाक्याकांक्षा एवं सकलव्यासेषु

व्यु॰
१४

मोत्तविशेष्यवाचकपदसमभिव्याहृतप्रथमांतविशेषणवाचकपदत्वमाकांक्षाइत्याको
ताद्दैविध्येपि विशेष्यविशेषणेति शब्दानुगमसंभवात् पूर्वपक्षिणस्तुशब्दानुगम
स्याप्यभावात् स्वान्तरंस्वादिभिन्नेनिराकांक्षेपदेतदन्तरंयद्यत्तत्तद्भिन्नरूपंयत्स्वोत्तर
स्वादिभिन्नपदानन्तरत्वेत्तद्विशिष्टत्वप्रभेदकूटनिवेशनगौरवात् पूर्वोक्तेयत्वाच्च
प्रथमान्तगमेनसिद्धांतिमतस्यैवोचितत्वात् अथनीलंघटमानयेत्यादौनीलादेर्वि
हादावन्वयोपगमेनीलादिपदोत्तरविभक्त्यर्थस्यकर्मत्वादेः कुत्रान्वयइतिचेदिति
समाधत्तेनकुत्रापीतिपदसाधुत्वायप्रयुज्यमानाविभक्तिर्निरर्थिकेतिभावः संभ
वत्यर्थेसाधुत्वेपदसाधुत्वमन्याप्यमित्यभिप्रायिकंमतांतरमाह अभेदइत्यारभ्य
देतीत्यंतेन नीलोघटइत्यादौनीलप्रतियोगिकभेदाभाववान्घटइतिबोधात्
विशेषणविभक्तेरभेदोर्थः ननु अभेदोनामार्थयोःसंसर्गतयाभासतेइत्युक्तेतया
दृमसमासस्थलेएवेति नीलघटइत्यादितोनीलप्रकारकाभेदसंसर्गकघटविशे
ष्यकबोधोदयादितिभावः ननुसमासेपिविभक्त्यनुसंधानसंभवेःभेदोविभक्त्या

राम
१४

र्थएववास्त्वित्यतआह तत्रविभक्त्यनुसंधानेविनेति नञःप्रसिद्धिरिति भेदस्यकेवा-
लान्वयितयाऽभावांशप्रसिद्धिरित्यर्थः नलेहितत्वादिनेति घटत्वनीलभेदेनतद्भेय
प्रतियोगिकाभावस्यनलेमत्वादित्यर्थः नीलभेदत्वाद्यवच्छिन्नाभावस्याविभक्त्य-
र्थत्वेनीलादिपदार्थानन्वयप्रसंगइतिनलेनीलभेदरूपप्रतियोगिसत्त्वेनतदभा-
वासत्त्वान्नीलेनत्वमितिप्रयोगवारणेपिनीलोघटइत्यत्रविभक्त्यर्थनीलभे-
दाभावेप्रकल्प्येप्यस्यनीलस्यान्वयेनीराकांक्षत्वादितिभावः नञ्भेदप्रतियो-
गिकाभावएवविभक्त्यर्थः नीलपदसमभिव्याहारान्नीलभेदत्वावच्छिन्नाभावः
प्रतीयतेइतिवाच्यमितिनम् नीलपदसमभिव्याहारेनीलभेदत्वावच्छिन्नप्रतियो-
गिताकत्वसंबंधेनभेदविशिष्टोऽभावएवनीलभेदत्वावच्छिन्नाभावइत्यर्थःस-
मायतेपदार्थद्वयसंसर्गाभावस्यैवाकांक्षानियम्यत्वादितिनम् नतननत्पदार्थ
तत्तत्पदार्थतावच्छेदकस्यापिसंसर्गः पदांतरसमभिव्याहाराभ्यांपितृशक्ति-
गम्यइतिभावः नीलघटइत्यत्रनीलपदार्थस्यघटपदार्थेभेदसंसर्गाभासते

सत्वनीलपदसमभिव्याहाररूपाकांक्षानियम्यः नीलो घटइत्यत्रतत्भेदाभावो नील
पदोत्तरप्रथमार्थः तत्रभेदः पदार्थतावच्छेदकः अभावः पदार्थः पदजन्यप्रतीतिविशे
ष्यः तत्राभावपदार्थतावच्छेदकरूपभेदस्यनीलभेदत्वावच्छिन्नप्रतियोगिता
कत्वरूपः संसर्गः पदोत्तरसमभिव्याहाररूपाकांक्षालभ्योनभवति अपितुश
क्तिगम्यः शक्तिश्चभेदप्रतियोगिकाभावएवनतुनीलभेदत्वावच्छिन्नप्रतियो
गिताकत्वसंबंधेनभेदविशिष्टेऽभावेऽतोनभेदरूपपदार्थतावच्छेदकस्याभा
वरूपपदार्थेनीलभेदत्वावच्छिन्नप्रतियोगिताकत्वरूपस्यतादृशसंबंधस्यभा
नमिति यथाघटइत्यादौघटत्वस्यघटेसमवायसंसर्गः शक्त्यैवभासतेनतुपदा
न्तरसमभिव्याहारेणघटेघटत्ववैशिष्ट्येचशक्तिस्वीकारात्तथाप्रकृतेपीतिभा
वः समायतेभेदोऽभावश्चेत्यादिना विशेषणेति विशेषणविभक्तेर्नानार्थक
त्वेपि व्याख्यानार्थंकृतिवत्तमानत्वयोरिवाकांक्षावशाद्विशिष्टलाभ इत्यर्थः
एतेन विभिन्नशक्तिस्वीकारेणतथाचपदार्थः पदार्थेनान्वेतीतिव्युत्पत्तिभं

गोनेति भावः नीलं घट इत्यादावप्यभेदान्वयबोधापत्तिरिति नीलपदोत्तरद्वि
तीयार्थेऽभेदे नीलपदार्थस्याप्यवनिष्ठप्रतियोगितानिरूपकतयाभेदस्याप्यभाव
प्रतियोगितानिरूपकतया भावस्य च विशेषणतया घटेऽन्वयसंभवात् नी
लाभेदप्रकारकघटविशेष्यकबोधापत्तिरित्यर्थः ननु अभेदप्रकारकबोधे
विरुद्धविभक्तिराहित्यं तन्त्रमिति नेयमापत्तिरित्यत आह धात्वर्थेन घनवानित्या
दौ तृतीयया भेदबोधनात् अभेदप्रकारकबोधे विरुद्धविभक्तिराहित्यान
पेक्षणादिति द्वितीयादिनेति विशेषणवाचकपदोत्तरद्वितीयादिनेत्यर्थः या
विशेष्यपृष्ठस्पन्ते लिंगसंख्याविभक्तयः प्रायस्ता एव कर्तव्याः समानार्थे विशे
षणेष्विति हृदयं तेन नीलं घट इति वाक्यमेव न भवतीति भावः द्वितीयादिनेति वि
शेष्यवाचकपदे त्यक्तद्वितीयादीत्यादिना तृतीयापरिग्रहः स च कर्तृकरण
योरित्यादि सूत्रविहितैव ग्राह्या तेन धात्वर्थेन घनवानित्यादावुपपदविभक्तिस्थ
ले विशेष्यविशेषणपदयोरसमानविभक्तिकत्वेऽपि नाभेदबोधानुपपत्तिः

शंकते प्रमेयो घट इत्यारभ्य चेत्तत्त्वमित्यंतेन सर्वोपि प्रमेय इति प्रमेयभेदाप्रसिद्धेरित्य
र्थः नीलत्वादिनानीलभेदाभावस्य नीलघटादौ सत्वादिति नीलरूपाश्रयत्वादि
नानीलभेदस्य पीतरूपाश्रयघटादौ प्रसिद्धस्य नीलघटेप्यवभासत्वादित्यर्थः प
तेनेति एतेन नीलपटपरनीलपदघटितनीलो घट इति वाक्यप्रामाण्य प्रमेयेन
विशेषणतावच्छेदकीभूतनीलत्वप्रमेयत्वादिकमेव विशेषणाविभक्त्यर्थ इति प्र
मेयो घट इत्यादौ प्रमेयपदस्य प्रमेयत्ववान् घट एवं कंबुग्रीवादिमान् घट इत्यत्रापि
कंबुग्रीवादिमत्पदस्य कंबुग्रीवादिमत्ववान् घट इति बोधान्नानुपपत्तिरिति भावः
नन्विशेषणतावच्छेदकीभूतप्रमेयत्वादेर्विशेषणाविभक्त्यर्थत्वे प्रमेदार्थक
त्वप्रवादो व्याहत इत्यत आह नीलत्वादेरिति नीलो घट इत्यत्र नीलत्ववान् घट इति
बोधः नीलत्वे च नीलत्वावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्नाभाववद्रूपाभित्य
भेदार्थत्वकप्रवादः व्याहत इत्यर्थः ननु नीलत्वनीलरूपमेव न तन्नीलभेदाभा
वरूपमतो दोषांतरमाह नीलत्वादौ नीलत्वादिमत्त्व इत्यादिना नीलो घट इत्यत्र वि

शेषणाविभक्त्यर्थे नीलत्वे नीलत्वादिमतः प्रकृत्यर्थस्य स्वप्रत्ययार्थो नीलत्वादिमान् तद्वृ
त्तित्वे नीलत्वे इत्येवं स्वरूपतित्वसंबंधेनान्वयो वाच्यः स च न संभवत्याकांक्षाविरहादित्यर्थः
आकांक्षाविरहमेवोपपादयति यथाहीत्यादिना तद्विशिष्टे भूतले अधिकरणतया तद
न्वयो विरुद्धः घटवान् घटवानिति बोधाभावात् तथा तद्धर्मे घटे आधेयतया तद्धर्मवतो
घटवतः अन्वयोपि न घटवति घट इति बोधाभावादित्यर्थः उद्देश्यतावच्छेदकविधेययो
रैक्ये शाब्दबोधो न जायते इति नियमेप्याकांक्षाविरह एव बीजं वाच्यं तथा विभक्त्यर्थे
नीलत्वे आधेयतासंबंधेन प्रकृत्यर्थनीलत्वादिमतोप्यन्वयो न संभवति आकांक्षावि
रहादिति भावः अत एव कर्म गच्छतीत्यादिवाक्यस्य निराकांक्षत्वम् इति अत एव तद्ध
र्मे तद्धर्मवतः आधेयतयान्वयविरहादेव कर्मत्वे द्वितीयार्थे कर्मत्ववतः प्रकृत्यर्थ
स्य कर्मणः आधेयतयान्वये निराकांक्षत्वमित्यर्थः न चैवं संसर्गतामतेप्यनिस्तार इति
पूर्वं नीलो घट इत्यादौ नीलाभेदस्य नीलत्वादिरूपपदार्थतावच्छेदकरूपत्वे इत्यस्थले
नीलपदस्य नीलपदसमभिव्याहृते नीलो घट इति वाक्ये प्रामाण्यापत्तेर्दुर्वारत्वात्

मु॰
१

नीलवृत्तिनीलत्वादिरूपाभेदसंबंधेन नीलपदार्थवान्घटो भवत्येवेति प्रामाण्यापा
पत्तिरिवेरित्यर्थः समाधत्ते स्ववृत्तिनीलत्वादेः स्वास्मिन्नेव संबंधतोपगमेनेति
स्वनीलपदार्थो नीलघटः तद्वृत्तेः पटवृत्तेः नीलत्वादेः स्वास्मिन्नेव पटएव संबंधता
न घटे इति तादृशापत्तिप्रसंगाभावात् नीलपटपरनीलपदघटितनीलोघटइतिवा
क्यप्रामाण्यापत्तिरूपातिप्रसंगाभावादित्यर्थः यथा काष्ठलोष्ठादौ विद्यमानोपि
लोहित्यस्य स्वाश्रयसंयोगेन संबंधः किंतु स्फटिकादावेव लोहितः स्फटिक इति
विशिष्टबुद्धिनियामकत्वात् तथा नीलपटपरनीलपदघटितात् नीलोघट इतिवा
क्यात् घटे नीलत्वविशिष्टबुद्ध्युदयेन स्ववृत्तिनीलत्वादेर्घटे पटसंबंधो न स्वीक्रि
यते किंतु पटे एव स्वीक्रियते नीलः पट इति विशिष्टबुद्ध्युदयादिति भावः वस्तुत
स्त्विति नीलोघट इत्यत्र नीलघटव्यक्तिगतनव्यक्तित्वावच्छिन्नभेदाभावएव तत्ता
ह्यक्तीनां नीलादिरूपाश्रयव्यक्तीनां स्वास्मिन् घटे संबंधः एवं नीलपटपरनील
पदसमभिव्याहृते नीलोघट इति वाक्येपि नीलपटपरत्वेन नीलव्यक्तित्वावच्छिन्न

राम॰
१

भेदाभावो घटे नास्तीति नैतद्वाक्यप्रामाण्ये अन्यदेतदिति यथा भूतले घट इव तद्वृत्त्य
भूतले घटस्य घटप्रतियोगिकः संयोगः संबंधस्तत्संबंधतावच्छेदकं संयोगत्वं च
घटप्रतियोगिकसंयोगत्वं चेति विचारेण प्रकृतानुकूलः उभयथापि विशिष्टबुद्धिनि
यामकत्वरूपसंबंधत्वादत्रेत्यर्थे ह्यापीति भावः नचैवं विशेषणविभक्तेरभेदार्थक
त्वमतेपि तत्तद्व्याक्तित्वावच्छिन्नाभेद एव विभक्त्यर्थो वक्तव्य इति वाच्यमिति एवं त
तद्व्याक्तित्वावच्छिन्नाभेदस्य संबंधत्वस्वीकारे संभवत्यर्थे साधुत्वे पदसाधुत्वमन्वाख्य
मितिन्यायेन तत्तद्व्यक्तित्वावच्छिन्नाः भेद एव विशेषणविभक्त्यर्थोस्तु तेनैव नीलपद
घटनीलपदसमभिव्याहृतनीलो घट इति वाक्यप्रामाण्यवारणं संभवतीति भावः
समाधत्ते तथा सत्यपूर्वव्यक्तिनिष्ठतत्तद्व्यक्तित्वस्येति नीलो घटो भविष्यतीत्यत्र त
द्व्यक्तित्वावच्छिन्नप्रतियोगिताको यो भेदस्तादृशभेदत्वावच्छिन्नप्रतियोगिताको
भेदो नीलपदोत्तरप्रथमार्थस्तदेकदेशे तद्व्यक्तित्वप्रकारकत्वस्यार्थस्य नीलरूपवतोऽन्व
यः तथा च अपूर्वो भविष्यतीया नीलरूपाश्रयव्यक्तिः तन्निष्ठयत्तद्व्यक्तित्वं तस्य

व्यु.
१८

कथंचिदपि भानासंभवेन सामान्यलक्षणाजन्यभासकविरहाज्ज्ञानासंभवेन तदवच्छिन्नभेदा
भावेप्यपूर्वव्यक्तित्वावच्छिन्नप्रतियोगिताकभेदस्याभावे शक्तिग्रहासंभवेनापूर्वव्यक्ती
नामभेदान्वयानुपपत्तेः अभावत्वानेहि प्रतियोगितानेकारणामिति प्रतियोगिताना
भावात्तु शक्तिग्रहासंभवादपूर्वव्यक्तीनां अभेदान्वयबोधानुपपत्तिरित्यर्थः अभेदस्य
संसर्गतामतेपि नैषदोषः इत्याह संसर्गतानस्येति अनुपपत्त्यभावादिति नीलघटपर
नीलपदवदितरस्य नीलोघट इति वाक्यस्य प्रामाण्यापत्त्यभावात् इत्यर्थः नीलपदव्य
क्तित्वावच्छिन्नाभेदो नीलपदे एव न तु घटे इति न प्रामाण्यापत्तिरिति भावः पुनः शंकते
न च विभक्त्यर्थोपि भेदे इति भेदेः भावस्य प्रथमार्थः तत्र नीलत्वादिना नीलत्वादिप्र
कारेण भासमानानां तत्तन्नीलादिव्यक्तीनां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्व
संबंधेनैव भेदान्वयः एवं तादृशभेदानामपि नीलादिव्यक्तिभेदानामपि तत्तन्नीला
दिव्यक्तिभेदत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनाभावेन्वयः तावतैव एवमन्य
योगिकारेणैव तत्तद्व्यक्तित्वावच्छिन्नाभेदाभावस्य घटे भावादिति भावः समाधत्ते विशे

१८

दत्वाभ्युपगमे नकाप्यनुपपत्तिः न नीलघटपदवत् नीलोघट इति वाक्यस्य प्रामाण्यापत्तिः नीलपदव्यक्तित्वावच्छिन्नाभे १४

षणतावच्छेदकावच्छिन्नाभावप्रतियोगितायाः इति विशेषणतावच्छेदकं नीलत्वेन न
नीलत्वेन तु नीलव्यक्तित्वेन तथा चाभेदस्य विभक्त्यर्थतामते नीलपदपरनीलपदद्वघटित
स्य नीलो घटः इति वाक्यस्य प्रामाण्यापत्तिः नीलत्वावच्छिन्नप्रतियोगितायाः निरूपकत
याः भावे भेदे प्रतियोगिनो नीलस्य संबंधतया भानात् यद्वा संबंधतया संबंधघटकत
या भानात् नीलत्वावच्छिन्नभेदाभावस्य घटे सत्त्वान्नीलपदपरनीलघटित वाक्यस्य प्रा
माण्यापत्तिरित्यर्थः अन्यथा विशेषणतावच्छेदकनीलत्वावच्छिन्नप्रतियोगितायाः
संबंधत्वावच्छेदकत्वे विशिष्टस्य वैशिष्ट्यमिति रीत्या बोधे हि विशेषणतावच्छेदकप्रका
रकनिर्णयस्य कारणत्वादिति भावः ननु विशेष्ये विशेषणमिति रीत्याभावस्य
ले बोधे भ्रमे येन यावद्विशेषणोपस्थितिर्न स्येत तस्मिन्न्वार्थेन विशेषणतावच्छेदक
प्रकारकनिर्णयः कारणं अत आह प्रतियोगिविशेषिताभाववत्तानं त्विति सिद्धान्तीम
माश्रयते अभेदस्तादात्म्यमित्यादिना स्वसामानाधिकरण्यस्वप्रतियोगिवृत्तित्वो
भयसंबंधेन भेदाविशिष्टयत्तदन्यत्वमिति स्वं नीलघटव्यक्तिभेदस्तत्सामानाधि

व्या॰
११

करणेद्रव्यत्वेश्च घटस्वं नीलव्यक्तिभेदसत्त्वात्प्रतियोगिनी नीलघटव्यक्तिस्तद्वृत्तित्वे च द्रव्यत्वे
इत्युभयसंबंधेन भेदविशिष्टं द्रव्यत्वमेव तदन्यत्वेन तद्व्यक्तित्वे इत्यर्थः स्वप्रतियोगिवृत्तित्व
स्यैव संबंधत्वे स्वं नीलव्यक्तिभेदसत्त्वात्प्रतियोगिनी नीलव्यक्तिस्तद्वृत्तित्वे तद्व्यक्तित्वे इत्यने
न संबंधेन भेदविशिष्टमेव न तद्व्यक्तित्वमतो द्वितीयसंबंधनिवेशस्तथा च स्वं नीलव्यक्ति
भेदसत्त्वसामानाधिकरण्येन तद्व्यक्तित्वे नास्ति नीलव्यक्तिभेदवत्तिपदेन तद्व्यक्तित्वस्याभावात्
त्वसामानाधिकरण्यस्यैव संबंधत्वे स्वपदेन घटादिभेदसत्त्वसामानाधिकरण्येन तद्व्यक्ति
त्वे इति भेदविशिष्टमेव भवतीति स्वप्रतियोगिवृत्तित्वनिवेशः तथा स्वं घटादिभेदस्त
त्प्रतियोगिघटादिवृत्तित्वं तद्व्यक्तित्वे नास्तीत्यर्थः अपूर्वव्यक्तिनिष्ठस्य तादृशधर्म
स्येति नीलो घटो भविष्यतीत्यत्र भाविव्यक्तिनिष्ठस्य तद्व्यक्तित्वस्याविशिष्टत्वात्तमश
क्यत्वापि सामान्यलक्षणाद्यसंभवात् तद्व्यक्तित्वस्यैकमात्रवृत्तितया विशेषणेनातात्त
मशक्यत्वेपि एकमात्रवृत्तिधर्मत्वादिना सामान्यलक्षणप्रत्यासत्त्या सुग्रहत्वमेव एक
व्यक्तिमात्रवृत्तिधर्माः एतद्व्यक्तित्वरूपाः सर्वेषां तेषामेकव्यक्तिमात्रवृत्तिधर्मत्वेन तान्तमे

राम॰
११

भवादित्यर्थः सुग्रहत्वमेवेति। यद्यप्येवं सति तत्तद्व्यक्तित्वावच्छिन्नभेदाभावस्य तदर्थत्वे सत्त्वे चेत
घटादिगौरवाभावोक्तेः भेदस्य संसर्गतामते ऽपि घटतादृशानुगतताभेदस्यैव तथात्वमुचितमि
ति घटतादृशानुगतताभेदस्यैव तादात्म्यस्यैव तथात्वे संसर्गत्वमुचितमित्यर्थः संसर्गताम
ते ऽपीत्यपिना प्रकारतामते तादात्म्यस्य विभक्त्यर्थत्वमुक्तमेवेति सूचितं अभेदस्य संसर्ग
तामते दूषणमाह तत्तद्व्यक्तित्वावच्छिन्नभेदाभावकूटस्य विशिष्य तथात्वे घटो न नील
इत्यादिवाक्यजन्यबोधे प्रतियोग्यभावान्वयोस्तुल्ययोगक्षेमाविति न्यायेन तादृशानु
गतसंबन्धावच्छिन्नप्रतियोगिताकाननुगताभावा एव भासेरन्निति तथात्वे संसर्गत्वे
ऽप्ययमर्थः पीतघटे च घटो न नील इति वाक्यं प्रयुज्यते तत्र नञ्विनिर्मोकदशायां घटो
नील इत्यत्र येन संबन्धेन नीलपदार्थो घटे प्रतीयते तेनैव संबन्धेन नीलप्रतियोगिको
ऽभावो घटो न नील इति वाक्यात्प्रत्येतव्य इत्येव हि प्रतियोग्यभावान्वयोस्तुल्ययोगक्षे
मतानाम् तथा च घटो नील इत्यत्र घटे नीलस्याभेदः संसर्गः स च तन्नीलव्यक्तित्वाव
च्छिन्नप्रतियोगिताकभेदत्वावच्छिन्नाभावस्तन्नीलव्यक्तिनिष्ठः एवमनेकतादृशनीलरूपा

मु॰ २॰

अयव्यक्तित्वतद्व्यक्तिभेदत्वावच्छिन्नप्रतियोगिताकाः अनंताः अभावाः संबंधतया वक्तव्याः
त एव च संबंधाः पीतघटे चैत्रेण न नीलं इत्यत्र नीलाभावप्रतियोगितावच्छेदकसंबंधतया भासं
ते इति तादृशाननुगतसंबंधावच्छिन्नप्रतियोगिताकाः अनंता एवाभावाः भासंत इति
त्यर्थः ननु पीतघटे चैत्रेण न नीलं इत्यत्र तन्नीलव्यक्तित्वावच्छिन्नप्रतियोगिताकभेदत्वाव
च्छिन्नप्रतियोगिताकाभाव एकैकसंबंधावच्छिन्नप्रतियोगिताक एक एव नीलाभावः
प्रतीयतामित्याशंकामपनुदति ननु नीलादिवृत्तिप्रतियोगिताकैकोऽभाव इति तत्र हेतु
माह तथासति एकाभावभाने सति यत्किंचिन्नादृशाभाववत्तात्पर्येण अप्युक्तस्य नीलेपि
न नीलं इति वाक्यस्य प्रामाण्यं स्यादिति नीलानिष्ठतद्व्यक्तिभेदाभावसंसर्गेण नीलाभा
वबोधतात्पर्येणेत्यर्थः अयमाशयः यथा पीतघटे चैत्रेण न नीलं इत्यत्र यत्किंचिन्नील
व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्नप्रतियोगिताऽकाभावसंबंधावच्छिन्न
प्रतियोगिताकाभावः प्रतीयते तथा यत्किंचिन्नीलेपि एतत्संबंधावच्छिन्नप्रतियो
गिताकनीलाभावसत्त्वान्नीलेपि न नीलं इत्यस्य प्रामाण्यं स्यादित्यर्थः यत्किंचित्तादृशा

२॰

भावत्तात्पर्याणापत्तव्याप्तिकित्वावच्छिन्नभेदाभावसंबंधेननीलमेतन्नीलघटव्यक्तावेवाप्तिपत्त
व्याप्तित्वावच्छिन्नभेदाभावसंबंधावच्छिन्नप्रतियोगिताकनीलाभावः तन्नीलव्याप्तिकिमि
त्येसर्वत्रेति नीलांतरव्यक्तावपिनीलाभावोस्तीतिनीलेपिननीलइतिप्रयोगप्रामाण्ये
स्यात विशेषणाविभक्तेरभेदार्थकत्वेघटोननीलइत्यादौनञानीलाद्यभावप्रत्ययस्त्येच्य
ननन्नीलादिभेदइतिघटोनीलइत्यादौविभक्त्यर्थोनीलत्तादात्म्यप्रकारः घटोविशेष्यः
तादात्म्यीयस्वरूपसंबंधः घटोननीलइतिनञात्तद्घटविशेष्यकः तदात्म्यीयस्वरूपसंबं
धावच्छिन्नप्रतियोगिताकस्तादात्म्याभावप्रकारकोबोधोजन्यते नत्तनीलादिभेदःतत्त
नीलादिप्रतियोगिताकस्तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकोऽभावः येनतत्तोभेद
बोधकत्वस्यात तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्वस्यैवभेदलक्षणत्वा
दितिभावः तादात्म्यसंसर्गइतिमतेतत्तैवदोषः घटोनीलइत्यत्रनीलप्रकारकोघटविशे
ष्यकस्तादात्म्यसंसर्गकोबोधः ननात्ततादात्म्यससर्गावच्छिन्नप्रतियोगिताकोनीला
भावोघटेप्रत्याय्यतेइत्येतन्मतेननञोभेदबोधकत्वमव्याहतमेवेति नत्वनञोविनिर्मोके

नु॰ २१

नीलो घट इत्यत्र तादात्म्यं प्रकारतया भासते तेन न समभिव्याहारे घटो न नील इत्यत्र तादात्म्यं
संसर्गतया भासतामिति तन्नञो भेदार्थकत्वे तादात्म्यस्य प्रकारतावादिमतेऽपि तान्वयप्रति
क्षिप्यत इत्याह यादृशसमभिव्याहारस्थले इत्यादि नीलो घट इत्यत्र येन संबंधेन तादात्म्या
यस्य रूपसंबंधेन यत्र यद्धर्मविशिष्टे येन रूपेण नीलतादात्म्यत्वेन रूपेण यत्तत्वं नीलतादा
त्म्यत्वेन नञ्समत्वे प्रतीयते तेन तादृशस्थले घटो न नील इत्यादिस्थले नञा तत्र यद्धर्मविशिष्टेद्रू
पे यद्धर्मविशिष्टतादृशसंबंधावच्छिन्नतादात्म्यीयस्वरूपसंबंधावच्छिन्नतादृशयद्धर्मावच्छिन्न
नीलतादात्म्यत्वावच्छिन्नप्रतियोगिताकाभावबोधस्य व्युत्पत्तिसिद्धत्वात् नियम
सिद्धत्वादिति नञा नीलतादात्म्याभाव एव बोध्यते तेन तत्तादात्म्यसंबंधावच्छिन्नप्रति-
योगिताकनीलाभाव इति नञो न भेदबोधकत्वं तादात्म्यप्रकारतावादिमते इति भावः
ननु तादृशस्थले नञो न भेदबोधकत्वमित्युक्तौ समासेऽपि तन्नञ्ञस्तीत्याह अनीलघट
मानयेत्यादौ घटपदसामानाधिकरण्यानुरोधेन नञ्समानविभक्तिकयोः पदयोः
भेदबोधकत्वे सामानाधिकरण्येन तत्रेष्टमेवेत्यर्थः नीलभिन्नपरतया नीलभिन्नत्व

२१

बोधतात्पर्यकतया नञो भेदवत्तिलक्षणायाः स्वीकारात् तथाच नीलपदार्थस्य घटकदे
शे भेदेऽन्वयः भेदवतो घटेऽन्वयः ननु अन्यनीले घट इत्यत्र नीलपदार्थः तत्र यो भेदे भे
दस्य च घटेऽन्वये तु प्रासभवत्समासेऽपि निपातार्थत्वेन भेदान्वयस्य दृष्टत्वात् इति नञो न भेदव
त्तिलक्षणेति चेन्न तथा सति अन्यनीलमिति द्वितीयानुपपत्तेः इदं तत्त्वमवयवे यत्र भेदस्य
प्रकारता तत्रापि घटेन नीलरूपादिवाक्यस्य नीलाभेदाभावबोधकत्वेऽपि तन्नीलाभा
वस्य प्रतियोगिस्वरूपतया नञो भेदबोधकत्वेनानुपपत्तेः परन्तु भेदत्वप्रकारेण बोधो
भवति न वेत्यन्यदेतत् तत्र इति नीलाभेदाभावबोधकत्वेऽपीति विरोधार्थकेनापिशब्देन
अभेदाभावबोधनेऽपि न भेदबोधकत्वं नञः इति सूचितं तथापि द्वितीयाभावस्य प्रति
योगिरूपत्वेन अभेदाभावो नाम भेदाभावाभावः स च भेद एवेति भेदबोधकत्वं नञः
सूपपन्नमित्यर्थः तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभाववत्त्वं भेदत्वं भेदाभावप्र
तियोगिताकाभाववत्त्वं भेदाभावाभावत्वमिति प्रकारभेदेऽपि धर्मोपकपवग्रये देहिंस्थे
अभेदो न भेदाभावः किंतु अभेदस्तादात्म्यं तदभावो भावप्रतियोगिकत्वादतिरिक्तो

मु॰
२२

त्वंताभावएवनभेदरूपइतिनञोभेदबोधकत्वमेतन्मतेदुरुपपादमेवेति इदंत्वत्रावधेय
मित्यारभ्यइत्यन्यदेतादृशत्वेतोपाहोः सार्वत्रिकः इदंतत्त्वमिति नञश्चभेदइतिकल्पनेश
क्तिकल्पनेगौरवमितिनञोभेदेएवेति एकत्वादिसंख्यावाचिकायाविशेषणाविभक्ते
रभेदेशक्तिभ्रमः स्वारसिकलक्षणाग्रहो वा तत्रसर्वमतएवत्वभेदस्यसंसर्गतामतेवि
भक्त्यर्थतामतेच तादृशसमभिव्याहारज्ञानस्यघटमानतनीलपदघटमानत्वचघटपद
समभिव्याहारज्ञानस्याद्विविधबोधेअभेदसंसर्गकाभेदप्रकारकबोधेगुरुभूतहेतु
ताद्वयेअभेदस्यसंसर्गतामतेक्लिप्तप्रकारतावादिमतेतत्रअभेदप्रकारकैकविधबोधांगी
कारात्रगौरवमिति स्थलान्तरेप्रकारान्तरेणासंसर्गतामतेगौरवमाह एवंतादृशसम
भिव्याहारज्ञानघटितसामग्र्याः भिन्नाभिन्नयोगप्रताज्ञानघटितत्वघाद्वैविध्येनाभिन्न
विषयकप्रत्यक्षादिकंप्रतितादृशशाब्दसामग्रीप्रतिबंधकतायाअप्याधिक्यमिति
संसर्गतावादिमतेशक्तिभ्रमाधीनेस्वारसिकलक्षणाधीनेअभेदप्रकारकबोधेअ
भेदसंसर्गकबोधेचएकपदार्थेः अपरपदार्थवत्त्वसंसर्गवत्त्वद्वयप्रयोगप्रताज्ञानघटि

२२

नप्रथमांतनीलपदप्रथमांतघटपदसमभिव्याहारत्तानघटितशाब्दसामग्र्याः भिन्नवि
षयकप्रत्यक्षत्वेप्रतिप्रतिबंधकताधिके प्रकारतामतेनएकविधशाब्दसामग्रीप्रति
बंधिकेतिनगौरवं समाधत्ते अभेदसंसर्गतावादिनोक्तस्थलेपि तत्संसर्गकबोध
स्यैवोपगमादिति उक्तस्थलेपि शक्तिभ्रमस्वारसिकलक्षणाभ्यांअभेदप्रकारक
बोधस्थलेपिअभेदसंसर्गकबोधस्यैवोपगमात् शक्तिभ्रमेणस्वारसिकलक्षणयावो
धस्यापितस्याप्यभेदस्यसंसर्गतयाभानमुपगम्यते अतएवनामार्थधात्वर्थयोः साक्षा
द्भेदसंबंधेनान्वयबोधोनभवतीतिव्युत्पत्तेः साक्षात्पददानेन ग्रामंगच्छतीत्यादौग्राम
स्यगमनेसाक्षादन्वयोनास्तिकिंतुविभक्त्यर्थकर्मत्वद्वाराभवतितथाचग्रामनिष्ठका
र्मतानिरूपकत्वसंबंधेनग्रामस्यगमनेऽन्वयःस्वीक्रियतेइतिद्वितीयार्थोपिकर्मत्व
संसर्गघटकतयासंसर्गोभवतीतिभावः तेनसंसर्गतामतेपिएकविधबोधांगीका
रस्यदोषावकाशइति तन्नस्वसमानविभक्तिकेनस्वाव्यवहितपूर्ववृत्तिनानामपदेनो
पस्थापितस्यैवार्थस्याभेदः संसर्गतयाभासतेइतिव्याससमासभेदेननिरुक्ताकां

स्फु
११

तयोरेकस्याप्यभावात्कथं लोके पचतीत्यादावभेदान्वयबोधः स्यत्तेनासार्थ्यथात्वं
योरभेदान्वयबोधसाकाङ्क्षात्वं तेरोगपपादयति लोके पचतीत्यादिना कर्मत्वातिदेशात्क
र्मत्वोपचारात् क्रियापदस्य तत्समार्थकप्रत्ययात्तथात्वपस्याप्यार्थपरत्वादिति नत्वक्रि
याविशेषणानां कर्मत्वमित्यनुशासने क्रियापदे सार्थकप्रत्ययात्तथात्वपस्याप्यार्थपरे
सार्थकप्रत्ययात्तथात्वपस्याप्याप्याक्रियात्तद्विशेषणानां कर्मत्वमित्यनुशासनार्थः प्रकृ
ते लोके पाकः इत्यत्र बहुजोनिरर्थकतया सार्थकप्रत्ययात्तथात्वपस्याप्यनाभावात्
न पाकक्रियाविशेषणे स्तोके कर्मत्वसंज्ञाप्रसक्ताद्वित्तीयेति भावः वर्तमानत्वादीविव।
क्षास्थले इवार्थबोधप्रयोजिकाकांक्षाशालित्वे नैवतद्विवक्षास्थलेपि भावात्स्यात्मस्या
र्थवत्वादिति लोके स्थीयते इत्यादौ वर्तमानत्वविवक्षायां तात्पर्ये सति स्तोका वर्तमाना
स्थितिरित्यर्थबोधप्रयोजिकाऽऽत्मनेपदस्वैव यक्त्वपूर्वं यात्त्वरूपाकांक्षा घटादाथात्वत
दूपगुप्तरात्मनेपदत्वरूपा वाकांक्षावत्त्वशालित्वमस्तियस्मात्तथा वर्तमानत्वाविवक्षायाम
पि लोके स्थीयते इत्यादिभावप्रत्ययस्थले इयमेवार्थबोधप्रयोजिकाकांक्षावत्त्वमेव।

राम
११

पारिभाषिकार्थवत्वं तत्र स्वीयते इति भावः प्रत्ययेनेत्यूयेत्यलीति सार्थकप्रत्ययं तथा त्वप्रस्थाप्यक्रि
याविशेषणतानोकद्वितीयोपपद्यते इत्यर्थः आकांक्षामतेपि विवक्षात्वपत्ता तद्र्थाभावान्नवर्त
मानत्वबोधः केचित्तु तत्र पाकादाविति तत्र प्रत्ययं तत्स्थले ऽप्येकदेशार्थेपीति प्रकृत्य
र्थे इव प्रत्ययार्थे तत्पाकादिस्थलेऽपि अनुभवबलात् प्रकृत्येकदेशधात्वर्थे प्रत्ययार्थान्वयः इ
ति प्रकृतितदेकदेशान्यतरान्वितस्वार्थबोधकत्वं प्रत्ययानामिति व्युत्पत्तिः कल्पनीयेति
भावः ननु पचते पश्येत्यादौ प्रकृत्यंशार्थकर्तरि विशेषणत्वेनान्वितस्य धात्वर्थपाकस्य प्र
त्ययद्वितीयार्थकर्मत्वादौ विशेषणत्वेनान्वयस्याव्युत्पन्नत्वेन पाकादौ द्वितीयार्थकर्म
त्वान्वयवारणेपि द्वितीयार्थसंख्याविशेष्यतया पाकादावन्वयमापादयति तत्रापीति
सत्वे भवन्मतेऽपि स्वत्वसंसर्गतावादिप्राचीनमतेऽपि कर्मधारयत्वेनाभिमतात् रा
जपुरुष इत्याकारकात् तथाविधसमासवाक्यात् तादृशबोधस्वीकारस्य राजसंबंध्य
भेदबोधस्वीकारस्यावश्यकतया तादृशसामग्रीप्रतिबंधकतायाः स्वभेदसंबंधे
न राजसंबंधिप्रकारकपुरुषविशेष्यकशाब्दबोधजनक राजपुरुष इति समासवा
क्यघटितयोग्यताज्ञानादिसामग्रीप्रतिबंधकताया नवीनप्राचीनोभयमतसि
द्धत्वादित्यर्थः राजपुरुषसमासे राजपदे राजसंबंधिनि लक्षणा नवीनमतेनिह्

७०

फललक्षणास्वारसिकत्वेच्छाधीनाप्रयोजनवत्ताललक्षणान्तु प्राचीनमतेपि संभवतीति
अत्र राजपुरुषइत्यत्र प्राचीनमते विभक्त्यर्थस्वत्वादिसंसर्गकशाब्दबोधजनकसमा
सत्वेन तत्पुरुषत्वमिति लक्षणान्तत्पुरुषः यदा तु राजपदस्य राजसंबंधिनि स्वारसि
कलक्षणा तदा पदार्थद्वयाभेदबोधकसमासत्वे कर्मधारयत्वमिति लक्षणात्
कर्मधारयसमासः नवीनमते पत्रवाक्यावस्थायां समासावस्थायां च भेदबोधस्त
त्र कर्मधारयो यथा नीलमुत्पलं नीलोत्पलमित्यत्र राज्ञः पुरुषइतिवाक्यावस्थायां
राजसंबंधवान् पुरुषइति भेदबोधः निपातातिरिक्तनाम्नोर्थयोरभेदान्वयानियम
वत्वाद्राजसंबंधिनि निरूढलक्षणाग्रहे भेदबोधेपि न कर्मधारयसंज्ञा वाक्याद
शायां भेदबोधवत्वेन नवीनमतं दूषयितुं यत्तत्स्यादरम्यतदसित्येतेमतमुपन्यस्यति रि
यत्त्विति त्वद्दधिपश्येत्यत्र लुप्तद्वितीयास्मरणेन कर्मत्वमपश्यापत्ते दधिनिष्ठ
कर्मत्वानिरूपकदर्शनाश्रयत्वमिति शाब्दधीरेवं राजपुरुषइत्यत्र लुप्तषष्ठीस्म
रणेन संबंधबोधः तथा च राजनिरूपितस्वत्वाश्रयः पुरुषइतिबोधः एवं संबंधि

मुं॰
७१

निरूढलक्षणांस्वीकृत्याभेदान्वयांगीकारोऽयमर्थः शंकतेनचेति ऋद्धस्यराजमातं
गाइत्यापत्तिः राजसंबंधवंतोमातंगाइत्यन्वयबोधार्थः राजपदोत्तरलुप्तषष्ठीस्मर
णमावश्यकमतः समानविभक्तिकऋद्धराजपदाभ्याममभेदबोधः स्यादित्यर्थः
समाधत्तेयतस्तत्रऋद्धस्यराजपुरुषइतिवाक्येऋद्धराजादीनामभेदान्वयानुपप
त्यानाभियुक्तानामप्रयोगइतिप्रामाणिकानांऋद्धस्यराजमातंगाइत्यस्याप्रयो
गेप्यभेदान्वयानुपपत्तिर्नकारणम् समानविभक्तिकऋद्धराजपदाभ्यामृद्धस्य
राज्ञोमातंगाइत्येवऋद्धस्यराजमातंगाइत्यत्रापियोग्यतयाः भेदान्वयोबाध्यतां
नाम ध्यपितसमासघटकपदस्यापेक्षतयाराजपदस्यासामर्थ्यातिदेशात्तत्समासा
साधुत्वेनेति समर्थः पदविधिरितिसूत्रेणसमर्थानामेव परस्परसाकांक्षाणा
मेवसमासोविहितः सामर्थ्यंसमासेएकार्थीभावलक्षणमेकार्थीभावश्चविशि
ष्टैकार्थविशेष्यकबोधजनकत्वमिति तत्रयथारथवादिरोगद्विग्रायेचयाइत्यादावव्या
प्तेः किंतसमासघटकपदनिराकांक्षत्वेसतिपरस्परसमासघटकपदसाकांक्ष

७१

त्वेसमर्थत्वे ऋद्धस्य राजपुरुष इत्यत्र समासवदेकऋद्धपदसापेक्षतया राजपदस्य
असामर्थ्यातिदेशात् सापेक्षमसमर्थवद्भवतीत्यतिदेशबलात् तथा च ऋद्धस्य
राजपुरुष इत्यादावभियुक्ताभ्युपगतसमासासाधुत्वनिर्वाहाय यत्र समासाघटक
पदनिराकांक्षत्वरूपविशेषणबललभ्यसमासासाधुत्वमिहातिदेशिकं गौणं
र्त्तिदेशाद्दिमत्व्यवहारः यथा गोरश्वः पुरुषो हस्तीति निराकांक्षाणां स-
मासेः साधुत्वस्येहापि मत्व्यवहार इति एवं ऋद्धस्य राजमातंगा इत्यस्याप्यघो
गे समासासाधुत्वमेव हेतुरित्यर्थः तदुक्तं सविशेषणानां वृत्तिर्न वृत्तस्य विशेष
णयोगो नेति विशेषणसहितानां विशेषणानामेव वृत्तिर्न तु सविशेषाणां वि
शेष्याणामपि तेन सविशेषणानां मातंगानां राजरूपविशेषणेन सह समासः
इत्यर्थः एवं वृत्तस्य विशेषणतायोगो नेत्यर्थः न तु वृत्तस्य विशेषणस्य तेन सुं
दराजमातंगा इत्यत्र सुंदरविशेषणस्य मातंगे विशेष्ये न्वयः समासवदेकत्व
प्येनतदभिधायकमेव साविशेषणस्य राजपदस्य विशेषणस्य तेन ऋद्धा राजमाते

मु॰
७२

गाद्यनुपपत्तिः ऋद्धविशेषणपुत्रस्य राज्ञो विशेषणस्य समासरूपापत्तिर्न एवं सति
समस्तस्य राज्ञो विशेषणस्य ऋद्धस्येति विशेषणयोगोपि नेति तदर्थः तस्मादे
तत्वे च तदर्थान्वितस्वार्थपरत्वे समासघटकऋद्धपदार्थान्वितोयः स्वार्थो राज
पदार्थस्तत्परं तात्पर्यं यस्य तत्तदर्थान्वितस्वार्थपरं राजपदे तत्वं राजपदेस्ति
स्वार्थश्च स्वीयवृत्तिग्रहविशेष्यः स्वराजपदे तच्छक्तिग्रहो राजा राजपदशक्यस्ता
कारकस्तादृशविशेष्यो राजा तत्पदं ऋद्धपदे तदर्थान्वितः स्वार्थो राजपदार्थः स
च राजपदशक्तिग्रहविशेष्य इति राजपदे समासघटकऋद्धपदसापेक्षत्वं भवती
सा ति राजपदस्यासामर्थ्यात्समासाभावे अत एव तदर्थान्वितस्वार्थपरत्वमित्यत्र
स्वीयवृत्तिग्रहविशेष्य इत्यर्थकरणादेव शरैः शातितपत्रः चैत्रस्य दासभार्ये
त्यादौ न समस्यमानशातितदासपदादेः सापेक्षता तदर्थैकदेशशातनं दा
सत्वादावेव शरकरणकत्वं चैत्रनिरूपितत्वादीनामन्वयादिति मूलं तत्पद
समासघटकत्वेनापि पदे तदर्थः शरकरणकत्वं तदन्वितस्वार्थः शातितपद

७२

शक्तिग्रहविशेष्यः शान्तनकर्मपद्मादिकंनभवतिकिंतुशान्तनपदार्थैकदेशा
स्शान्तनक्रियैवभवति शरकरणकत्ववतीया शान्तनक्रियातत्कर्मपद्मस्य
सरस्त्वर्थात्पवंचैत्रस्यदासभार्येत्यत्रतत्पदंसमासघटकपदंचैत्रस्येतिषष्ठीप
देतदर्थोनिरूपितत्वंतदन्वितःस्वार्थः दासपदशक्तिग्रहविशेष्योदासोन
भवतिकिंतुदासपदार्थैकदेशोदासत्वमेवातद्रूपंचैत्रनिरूपितत्ववद्दासत्वंतद
तीभार्येत्यर्थात्तेनतत्समस्यमानशान्तनदासपदादेः समासघटकशरैरि
तिचैत्रस्येतिपदस्यापितत्वयेनासमर्थत्वात्समासोनस्यादित्यर्थः तदर्थान्विते
त्यत्राभेदान्वयोवानिवेशनीयइतीतितदर्थेसमासघटकस्वरूपपदार्थैरभेदसं
बंधेनान्वितोयःस्वार्थः राजपदार्थोराजानंतत्परत्वेराजपदेऽस्तीतिसमासघट
कपदस्यापितत्तयाराजपदस्यासामर्थ्यात्समासोनस्यादित्यर्थः शरैःशान्तनय
इत्यत्रसमासघटकशरैरितिपदंतत्पदंतदर्थः शरकरणकत्वं तत्रशरकरण
कत्वेत्राभेदेनान्वितःस्वार्थःशान्तनपदार्थैकदेशः शान्तनंनभवतिशान्तनत्वेश

रुकरणकत्वरूपेणभवतिकिंतुप्रकारकरणकत्वमुद्भवतीति नसमासाद्यवच्छेदकपदसापे
क्षेणतस्यसमासस्यार्थान्तरमासेनस्यादित्यर्थः एवंचैतस्यदासभार्याइत्यत्रापिचैत्रनिरू
पितदासत्वाभेदोनास्तिकिंतुचैत्रनिरूपितदासत्ववतीभार्येत्यर्थान्नदोषः अ
स्मिन्नपक्षेस्वार्थपदेनस्वीयवृत्तिग्रहविशेष्यानग्राह्यः किंतुवृत्तिग्रहविषयोयद्या
दृशःप्रकारोवाविशेष्योवाग्राह्यः यत्त्वित्यादिनोक्तंमतेदूषयति राजपदस्यराजसंबं
धिनिस्वारसिकलक्षणाग्रहस्यलानुरोधेन तादृशसमभिव्याहारज्ञानादेः राज
पदाव्यवहितोत्तरपुरुषपदज्ञानादेः तथाविधजनकतायाः संबंधीपुरुषइतिबो
धजनकतायाः त्वन्मतेनासिद्धत्वात् तत्रराजपुरुषपदेराजपदेनिरूढल
क्षणास्वीकारेगौरवाभावादिति अयमाशयः राजसंबंधीपुरुषइतिबोधराज
पुरुषइत्यानुपूर्वीविशेषरूपसमभिव्याहारज्ञानं कारणं राजपदजन्यराजत्वाव
च्छिन्नपदार्थोपस्थितिः सहकारिणीवृत्तिश्चशक्तिः शक्यसंबंधरूपालक्षणा
चतत्रशक्तिलक्षणान्यतररूपवृत्तिज्ञानस्यपदार्थोपस्थितिद्वाराशाब्दबोधंप्रति

कारणतायां लक्षणानिष्टस्वारसिकत्वनिरूढत्वज्ञानमपि कारणं न भवतीति येन
गौरवं भवेदिति स्वारसिकत्वनिरूढत्वविशिष्टलक्षणाज्ञानं कारणमिति शंकते
नचेति स्वारसिकलक्षणाग्रहस्थले तादृशान्वयबोधस्य राजसंबंधी पुरुष इत्यन्व
यबोधस्य नवीनप्राचीनोभयमतसिद्धत्वेपि निरूढलक्षणामते निरूढलक्ष
णावादिनवीनमते संबंधीतात्पर्यस्य राजपदस्य राजसंबंधीबोधे तात्पर्यस्य
अनादित्वकल्पनागौरवमिति स्वमतवक्तः शक्तातदधीनालक्षणास्वारसिकील
क्षणा एवं च अनादितात्पर्यवक्तुरिच्छातद्विषयीभूतोर्थो राजसंबंधीतन्निष्ठाश
क्यसंबंधरूपालक्षणा निरूढलक्षणा एवं च स्वारसिकनिरूढयोर्लक्षणयोः
साम्येपि निरूढलक्षणाचटकतात्पर्येऽनादित्वविशेषणमधिकमिति गौ
रवमित्यर्थः तथा च राजपुरुष इत्यत्र लुप्तविभक्तिस्मरणेन राजसत्त्वान् पुरुष
इति बोधः समनचित्तेन तु निरूढलक्षणया भेदसंबंधेन राजसंबंधी पुरुष इति
बोध इति प्रांकाशयः इति समाधत्ते राजपुरुष इत्यादिवाक्यजन्यशाब्दबोधात्पूर्वं

मुः
७४

नियमतोलुप्तविभक्तिस्मरणकल्पनापेक्षयातात्पर्यानादित्वस्यकल्पनायांगौरवावि
रहादितिशक्तिनियमस्तस्मात्शाब्दबोधकार्यात्पूर्वकालेकारणीभूतेलुप्तविभ
क्तिस्मरणेकल्पनीयेयदायदायंशाब्दबोधस्तदापूर्वंतदालुप्तविभक्तिस्मरणमि
तिनियमतः अनेनाविभक्तयन्तःसंयोगस्यासरूपाणांतः राज्ञोः राज्ञांवाश्रुतत्वे
पितात्पर्यवशाच्छाब्दबोधसंभवात् नपुंसकात्स्वमोर्लुगितिसूत्रेणानेनाः
विभक्तिलोपः तासामनेनानिस्मरणानितेषांचसंबंधोपस्थितिप्रत्यनेनानि
कारणत्वांशशरीरेचानन्यथासिद्धत्वम्यापिस्वरूपनियमश्चेदित्तत्वाज्ञातिग्रहतत्व
गौरवेनलुप्तविभक्तिस्मरणकल्पनाधीनमित्यभिप्रेत्योक्तंलुप्तविभक्तिस्मरण
कल्पनापेक्षयेति तात्पर्यानादित्वकल्पनीयांगौरवविरहादितीति तात्पर्य
विषयीभूतार्थेशाब्दसंबंधरूपलक्षणासिद्धेवतात्पर्यस्यानादित्वरूपधर्मसमा
वकल्पनेऽप्यधिकेपूर्वमतेतलुप्तविभक्तिस्मरणादृष्टायधर्मिणोधर्मस्यचकल्पनीया
द्रत्ययमिकल्पनातोधर्मिकल्पनालघीयसीतितात्पर्यानादित्वकल्पनेगौरवमितिभावः

निकारणता

७४

तात्पर्यं॰नादित्वेच स्वज्ञानजन्यशाब्दबोधध्वंसकालीनस्वज्ञानजन्यशाब्दबोधसामा॰
न्यकत्वं स्वतात्पर्यंतज्ज्ञानजन्योयः शाब्दबोधः राजसंबंधी पुरुष इति शाब्दबोधः त
ध्वंसकालीनस्वज्ञानजन्यस्वतात्पर्यंतज्ज्ञानजन्यशाब्दबोधसामान्यशाब्दबोधसा
द्वेयस्य स्वस्यतात्पर्यस्य तत्तात्पर्यस्वज्ञानजन्यशाब्दबोधध्वंसकालीनस्वज्ञानज
न्यशाब्दसामान्यकत्वं तत्तात्पर्यैः स्तीत्यर्थः अत्रतात्पर्यंचैत्रीयंमैत्रीयंविशिष्य
नग्राह्यंकिंतुतात्पर्यत्वेनतात्पर्यमात्रंग्राह्यं तथाचतात्पर्यज्ञानजन्यः सर्वोपिशा
ब्दबोधः पूर्वपूर्वतात्पर्यज्ञानजन्यापेशाब्दबोधात्सद्ध्वंसकालीनोभवतीतिसर्वम
पितात्पर्यंस्वज्ञानजन्यशाब्दबोधध्वंसकालीनस्वज्ञा नजन्यशाब्दबोधसामान्य
कंभवति स्वारसिकत्वदशायांस्थलेतु चैत्रीयप्रामाणिकतात्पर्यज्ञानजन्यप्रामा
णिकः शाब्दबोधः चैत्रीयप्रामाणिकतात्पर्यज्ञानजन्यशाब्दबोधः नतुध्वंसकाली॰
नोनभवतीतिः अनादित्वेनास्तिनिरूढत्वदशायांस्थलेतु सर्वोपितात्प र्यज्ञानजन्या
शाब्दबोधाः पूर्वपूर्वतत्तात्पर्यज्ञानजन्यशाब्दबोधध्वंसकालीनाः भवंत्येवेतिनिष्का

व्यु॰
७५

तात्पर्यस्यानादित्वमस्ति अत्र प्राथमिकत्वं कस्मिंश्चिदपि तात्पर्ये नास्ति पूर्वंपूर्वं तत्तत्तात्पर्यसत्वा
दिति भावः यत्र राजपदस्य राजसंबंधिनि स्वारसिकलक्षणाग्रहस्तत्र तादृशबोधस्य राज
संबंध्यभिन्नपुरुष इति बोधस्य उभयमतसिद्धतया तादृशसमभिव्याहारस्य राजपुरुष
इति समभिव्याहारस्य राजसंबंधिनि पुरुषत्वबोधे कारणतायां लक्षणयैव निर्वाहे
सर्वत्र लुप्तविभक्तिस्मरणकल्पने मानाभावादिति केचित्तत्के उत्तोलितः प्राचः
मतगतार्थत्वात्तन्नयुक्तः वृत्त्या राजसंबंधिनि राजपदस्य शक्तिं विना राजपुरुष इत्याकारक
समभिव्याहारमात्रेण राजसंबंध्यभिन्नः पुरुष इति शाब्दबोधासंभवात्तन्नयुक्तः
इति नव्यैर्वक्तव्यमिति एवं लुप्तविभक्तिस्मरणं विनैव निरूढलक्षणया निर्वाह इत्यर्थः
प्राचां तत्र दर्शने न समतत्पदस्य दधिकर्मकस्याभेदान्वयसंभवात्तत्रापि दधिपदे लुप्त
विभक्तिस्मरणं न कल्पनीयमिति शंकां ग्रंथः समाधत्ते दध्यादिपदस्य दधिक
र्मकादौ लक्षणाग्रहे तस्य दधिपदस्य द्वितीयेतराविभक्तिः प्रथमातृतीयादिः
तद्भ्रमदशायां दधिकर्मपश्यतीत्यादिवत् उक्तस्थलेऽपि दधिपश्यतीत्यत्रापि प्रथ

७५

मात्तृतीयांतत्वभ्रमदशायां दधिकर्मकदर्शनबोधानुदयात् दधिपदस्य दधिक
र्मकेत्वलक्षणात्तच्च प्रथमान्ततृतीयादिभ्रमे दधिकर्मकः पश्यति दधिकर्मकेन
पश्यतीत्यादाविव दधि पश्यतीत्युक्तस्थलेऽपि दधिकर्मकदर्शनान्वयबोधान
दयात् हेतोः द्वितीयान्तदध्यादिपदसमभिव्याहृतपश्यतीत्याद्युपस्थितित्वेन
दधिकर्मकदर्शनान्वयबोधं प्रति हेतुतायाश्चावश्यकत्वात् दधि पश्यतीत्यादौ
लुप्तद्वितीयानुसंधानस्यावश्यकत्वात् दधि पश्यतीत्यत्रैव राजपुरुष इत्यत्रापि
नैविभक्त्यनुसंधानावश्यकत्वे राजसंबंधिपुरुष इति बोधं प्रति राजपदोत्तरविहि
तोत्तरपुरुषपदवत्त्वतानत्वेन कारणत्वात् तृतीयान्तत्वभ्रमस्थले तृतीयाद्य
व्यवधानात् राजपदोत्तरविहितोत्तरत्वपुरुषपदे नास्तीति कारणाभावादेव
न राजसंबंधी पुरुष इति बोधापत्तिरिति न षष्ठ्यनुसंधानापेक्षेत्याहुः राजसंबंधि
पुरुष इत्याद्यन्वयबोधे चेत्यादिना राजपुरुष इत्यादाविव दधि पश्यतीत्यादौ
दधिपदोत्तरविहितोत्तरपश्यतिपदत्तानत्वेन कारणता न संभवति पश्यतिदो

मु॰
७६

पश्यतिचैत्रोदधिइत्यादौव्यभिचारात्तस्माद्द्वितीयान्तसंस्थानमावश्यकमित्याहुःदधि
पश्यतीत्यादौदधिपदाव्यवहितोत्तरप्रकारकथान्तपदज्ञानस्यहेतुतायाश्चक्ल्
प्तत्वादिति शंकतेतंडुलंपचतीत्यादौइत्यारभ्यइतिनत्वितिनीयमित्यंतेनग्रंथे
न नातिप्रसंगइति (तंडुलंपचतीत्यत्रतंडुलंपचतीत्यादौइत्यारभ्यइतिनत्वितनी
यमित्यंतेनग्रंथेन नातिप्रसंगइति) तंडुलंपचतीत्यत्रतंडुलकर्मकबोधेद्वि
तीयासमभिव्याहारोनियामकः राजपुरुषइत्यत्रराजसंबंधिपुरुषइतिबोधेषष्ठी
समभिव्याहारोनियामकइतिद्वितीयादिसमभिव्याहाराभावात्तंडुलःपचती
त्यत्रनतंडुलकर्मकेतंडुलपदेलक्षणेतिनातिप्रसंगइत्यर्थः केवलप्रकृतिप्र
योगोस्तितंडुलःप्रमेयइत्यत्रकेवलप्रकृतिप्रयोगोनास्तीतिप्रकृतौलक्षणा
नप्रत्ययेइत्यतंडुलःकेविभक्तेरेवप्रकृत्यर्थविशेषितस्वार्थेतंडुलकर्मकेलक्षणे
तितुनसंभवतीति समाधत्ते राजादिपदस्यराजसंबंध्यादिशक्ततांभ्रमदशा
यामिवतद्धर्थेलक्षणाग्रहदशायामपिराजसंबंधिनःपुरुषइत्यादावपिराजसंबं

७६

धिसंबंधीत्याद्यन्वयबोधस्य सर्वानुभवसिद्धत्वादिति शक्तिभ्रमस्थले स्वारसि
कलक्षणायां च राजपदस्य राजसंबंधिन्यर्थः षष्ठ्याश्च संबंधोऽर्थः तथा च राज्ञः
पुरुष इत्यत्र राजसंबंधिसंबंधवानिति बोधात् षष्ठ्याः संबंधबोधकतावश्य
कत्वे निरर्थकत्वेनास्तीत्यर्थः राजसंबंधिनः पुरुष इति दृष्टांतः राजसंबंधिप
दोत्तरषष्ठ्याः संबंधोऽर्थः राजसंबंधिसंबंधवान्पुरुष इति बोधात् पचति चैत्र इ
त्यत्र कृतिसंबंधेन पाककर्तृत्ववांश्चैत्र इति धीः न पचतीत्यत्र कृतिसंबंधावच्छिन्न
प्रतियोगिताकपाकाभाववांश्चैत्र इति शाब्दबोधो वक्तव्यः स च न संभवति कृ
तेः स्वत्वनियामकत्वाभावात् ननु कृतिराख्यातार्थः आश्रयता च वृत्तिनियामकः
संबंध इति पाकानुकूलकृतिमांश्चैत्रः इति बोधः न पचतीत्यत्राश्रयतासंबं
धावच्छिन्नकृत्यभाववांश्चैत्र इति बोध इत्याह पचति चैत्र इत्यादावधीत्यादिना पुनः
शंकते ग्रंथैवमित्यारभ्य चेदित्यनेन ग्रंथेन एवमपि कृतिसंबंधस्य वृत्त्यनियाम
कतया न पचति चैत्र इत्यत्र शाब्दबोधानुपपत्त्याः स्यान्नञः कृत्यर्थकतया सा

व्यु.
७८

शंकोपपादनेपि चैत्रोनजानातीत्यत्र ज्ञातिनियामकाश्रयतासंबंधावच्छिन्नप्रतियो
गिताकज्ञानाभाववांश्चैत्र इति बोधसंभवादाख्यातस्याश्रयतार्थकत्वंनैयमि
कमित्यर्थः नचधात्वर्थज्ञानादेरिति साक्षादिति आश्रयत्वरूपमाख्यातार्थ
मङ्गीकृत्यधात्वर्थज्ञानादेराश्रयतासंबंधेन चैत्रादौ प्रकारत्वे ज्ञानंचैत्र इत्या
दावपिज्ञानवांश्चैत्र इत्यन्वयबोधापत्तिः पदार्थोपस्थितियोग्यताज्ञानादि
सामग्रीसत्वात् तथा चैतदापत्तिवारणाय न धात्वर्थज्ञानादेः साक्षात् चैत्रा
दिप्रातिपदिकार्थे प्रकारतासंबंधेनान्वयः किंतु ज्ञानरूपधात्वर्थस्याख्या
तार्थाश्रयत्वे तस्य च चैत्रे ज्ञानाश्रयत्ववांश्चैत्र इति बोधादाख्यातस्याश्रयतार्थ
कत्वमावश्यकमिति सिद्धान्तितोमथ्येशंकेतिभावः पुनरपिशब्दपक्षीसिद्धां
तिशंकामुद्धरतिज्ञातेत्यादिनान्वयबोधे इति ज्ञानवांश्चैत्र इति ज्ञानप्रकारकचैत्रवि
शेष्यकाश्रयतासंसर्गकबोधे आख्यातानां तथात्वसमभिव्याहारज्ञानस्यहेत
त्वात् जानातीत्येकवचनांतसमभिव्याहृतप्रथमांतैकवचनांतचैत्रादिप

७८

रथा

दृजन्योपस्थितित्वेनकारणत्वादित्यर्थः तथाचत्वानेवैवमस्त्यत्राख्याततोतथात्व
समभिव्याहाराभावान्नत्वानवांछेवमस्तिबोधापत्तिरित्याख्यातस्याश्रयत्वार्थ
कत्वकल्पनेनिर्युक्तिकमितिभावः भवतोप्याश्रयताप्रकारकबोधेतादृश
समभिव्याहारत्वानहेतुतायाआवश्यकत्वादितिमूलेभवतोपिआख्यातस्या
श्रयतार्थकतावादिसिद्धांतितोपिआश्रयताप्रकारकबोधे त्वानाश्रयत्ववां
छेवमस्तिबोधेतादृशसमभिव्याहारत्वानहेतुतायाः त्वानातिचैवमस्त्याकार
काख्यातैकवचनान्तत्वाथान्तसमभिव्याहृतप्रथमैकवचनान्तचैवपदत्वान
स्त्वानवांछेवमस्त्यादिशाब्दःप्रतिहेतुतायाआवश्यकत्वात अन्यथात्वाने
तिचैवमस्त्याकारकबहुवचनांतत्वाथान्तएकवचनान्तचैवपदसमभिव्याहा
रस्थलेपिआश्रयताप्रकारकशाब्दबोधापत्तेः पदजन्यपदार्थोपस्थित्या
दिसामग्रीसत्वादितिपूर्वपक्षिणोपिसमभिव्याहारत्वानुकारणतानाधिके
तिनाख्यातस्याश्रयत्वमर्थइतिभावः आख्यातसमसार्थकतांप्रवस्थापयति

मु॰
७८

त्वारभ्यतदंशमहिम्नेतदंशेनआवश्यके कृतिप्रकारकसमवायसंसर्गकबोधं
प्रतिसमवायेनाख्यातजन्यकृत्युपस्थितित्वेनकारणतेत्युभयमतसिद्धत्वेना
वश्यकमित्यर्थः तथाचतत्तदर्थविशेषणमिवेश्यते पचतीत्यत्रकृत्युपस्थिति
त्वेनजानातीत्यत्राश्रयत्वोपस्थितित्वेननश्यतीत्यत्रनाशप्रतियोगित्वोपस्थि
तित्वेनात्मनिष्ठप्रत्यासत्त्याकारणतास्वीकारेशाकल्लत्वसदृशार्थभेदेनाख्या
तजन्योपस्थितीनांकारणतावाहुल्यमित्यर्थःविशेषणान् अनिवेश्यविषयनिष्ठ
प्रत्यासत्त्यैवपचतीत्यादौविशेष्यतासंबंधेनधात्वर्थयागप्रकारकान्वयबोधं
प्रतिविशेष्यतासंबंधेनाख्यातत्वप्रत्ययजन्योपस्थितित्वेनकारणतास्वी
कारेलाघवमित्यर्थः अनुकूलतासंबंधेनपाकवतीकृतिरितिबोधाद्विशेष्य
तयाश्रमत्वबोधाद्विशेष्यतयाकाशाद्बोधप्रत्ययजन्योपस्थित्योः कृतौसत्त्वादि
तिभावः तादृशकारणताबाधेनेति चैत्रेणजानातीत्यत्रचैत्रेविशेष्यतासंबंधे ७८
नाख्यातत्वप्रत्ययजन्योपस्थितेस्तत्वकारणत्वाभावेनचैत्रोज्ञानवानितिबोधो

नसंभवतीत्यर्थः ननु धात्वर्थप्रकारकान्वयबोधं प्रति प्रत्ययजन्योपस्थितेः
समानविशेष्यतासम्बन्धेन हेतुत्वं तदोपपद्येत यदि धातुत्वे प्रत्ययत्वे वानु
गते भवेतां तदेव तु न भ्वादिगणपठितत्वे सति क्रियावाचकत्वं धातुत्वमिति हृषि नु
तमन्यत्र एवं प्रकृत्यनन्तरं विधीयमानत्वं प्रत्ययत्वमित्यपि वक्तुं पटत्व इत्यत्र बहु
ज्ञादिप्रत्ययैः व्यभिचारादित्याशयेनाह धातुत्वप्रत्ययत्वादीनामननुगततानोऽदु
र्निर्वचनतयाननुगततादृशाननुगतकार्यकारणभावकल्पने संभवतीति मन्यते र
ति मूले तथा च धात्वर्थप्रकारकान्वयबोधे प्रत्ययजन्योपस्थितेः कारणत्वात्
चैत्रो नानातीत्यादौ तानवांश्चैत्र इति बोधे प्राचीनमते बाधकाभाव इत्याख्या
तस्यानिरर्थकत्वं तदवस्थमिति भावः यत्तु मते भूयोऽप्याख्यातसार्थक्यमुपपा
दयति तदापीत्यादिना तदापि धातुत्वप्रत्ययत्वादीनामननुगततया धात्वर्थ
प्रकारकान्वयबोधे प्रत्ययजन्योपस्थितेः कारणत्वेऽपि पचन्ताद्धातोरेव पाका
दौ लक्षणा न च नानातीत्यादिवाक्यात् पाककृत्यादिप्रकारकान्वयबोधोऽस्त्वे

स्रं ७५

तिमूलेत्रयद्यपिपाकप्रकारककृत्यादिविशेष्यकबोधोन्वयस्तेत्र वक्तुमुचितं तेन त
चैत्रविशेष्यककृतिप्रकारकबोधोवक्तुमुचितः पूर्वमुक्तत्वात् धात्वर्थप्रकारका
न्वयबोधेतदव्यवहितोत्तरतिङ्त्वानजन्यकृत्युपस्थिते विशेष्यतासंबंधेनेष्टत
त्वादिरूपसंसर्गावच्छिन्नतथाविधकृतिप्रकारकएवनधात्वर्थप्रकारकः चैत्रविशे
ष्यकोबोधइतिवक्तुं पूर्वोक्तस्यकारणाघटत्वोक्तमिति त्वाधात्वर्थतिन्यादीना
मननुगतत्वनयाघटत्वात्तोरेवपाकगमनपवनाद्यनेकव्यापारेषु लक्षणानवच्छ
लक्षणायामतो चैत्रेणान्नानीत्यादिवाक्यात्पाकगमनाद्यनुकूलकृत्यादिप्र
कारकान्वयबोधोन्यत्याविशेष्यतासंबंधेनत्वाधात्वर्थप्रकारकान्वयबोधे
कृतेर्ज्ञायमानेत्वाधात्वव्यवहितोत्तरत्वि स्वतत्त्वादिप्रकारकेतिङ्तत्वादिवि
शेष्यकेत्तानेतत्तन्योपस्थितेः कृत्युपस्थितेः विशेष्यतासंबंधेनकृतोसत्वेन
हेतुतायाः तत्र चैत्रेणान्नानीत्यादिवाक्यस्थलेकल्पनीयतया नातिप्रसङ्गःकारण
ताबाधात् त्वाधातूत्तरतिङ्जन्योपस्थितिरूपकारणस्यविशेष्यतासंबंधेनचैत्रेः

७५

भावात्तैर्योग्यतानातीत्यवगतानवाक्ष्यैवश्रत्याकारकशाब्दबोधानुपपत्तिर्दुर्वारैवेत्यर्थः
तावाता: पाकगमनादिल्लक्षणायामात्मनिष्ठप्रत्यासत्त्याकारणतास्वीकारे
पूर्वोक्तरीत्यापाकगमनाद्यनेकार्थविशेषान्निवेशप्रकारेणतायांगौरवंविष
यनिष्ठप्रत्यासत्त्याकारणत्वेतुतादात्म्यताननन्योपस्थितिविषयत्वेनयाकग
मनाद्यनेकधातत्त्वलक्षणार्थान्निवेशपूर्णविशेष्यतासंबंधेनक्कृतोन्नायमानेताधा
त्वर्थपाकगमनादिप्रकारैर्बोधेनिमत्ततत्त्वादिप्रकारकाति समासादिविशेष्य
कत्वाननन्योपस्थिते: कृत्युपस्थितेर्विशेष्यतासंबंधेनक्कृतोसत्वात् पाकगम
नाद्यनुकूलायाक्कृतितंडुलेश्वरतिबोधोनतत्प्राप्यज्ञातासंबंधेनतानवोक्षे
त्रःतिबोधः कारणीभूततातिज्ञन्योपस्थितेर्विशेष्यतासंबंधेनचैत्रेवाधात्
किंतुतादात्म्यसमभिव्याहृतौतिज्ञन्योपस्थितिर्लक्षणयाश्राश्रयत्वेविशेष्यता
संबंधेनसत्वात्तादात्म्यार्थज्ञाननिष्ठप्रकारतानिरूपिता श्रयत्वनिष्ठविशेष्य
तामित्वप्रकारतानिरूपितचैत्रनिष्ठमुख्यविशेष्यताशालिज्ञानाश्रयत्ववोध्ये

व्यु॰
८०

चेत्तिबोधोनापत्तेस्तात्पर्याख्यानतत्समासार्थकामनस्त्वमेवेति अथैवमपीत्यादिश्रुत्वपदी
भूयोपिधात्वर्थप्रकारकचैत्रविशेष्यकबोधमुपपादयति प्रत्ययानर्थविशे
ष्यकबोधेव्यभिचारवारणायेति ज्ञानजन्यत्वात इत्यादौ ज्ञानप्रकाश्रयविशेष्य
कबोधोशवायर्थे आश्रयेन्नापत्तेत्तत्रानिवृत्तानजन्योपस्थितेरभावाद्व्यभिचारस्त
द्वारणायतादृशोपस्थितिवैशिष्ट्यस्य निरुक्तानजन्यकृत्युपस्थितिवैशिष्ट्यस्य
तादृशोपस्थितिकार्यतावच्छेदककोटाववश्यंनिवेशनीयतयाऽख्यातजन्य
कृत्युपस्थितिवैशिष्ट्यस्य तादृशोपस्थितिकार्यतावच्छेदककोटाववश्यंनि
वेशनीयतयाऽख्यातजन्यकृत्युपस्थितिनिरूपकारणजन्यत्वाधात्वर्थपा
कादिप्रकारकशाब्दबोधत्वरूपकार्यतावच्छेदकं निवेशनीयंतत्वेत्यर्थः तथा
चाख्यातार्थकृत्युपस्थित्यव्यवहितोत्तरत्वानधात्वर्थपाकादिप्रकारकशाब्द
बोधत्वावच्छिन्नंप्रतित्वाधात्वतराख्यातजन्यकृत्युपस्थितित्वेनकारणत्वमिति
ज्ञानजन्यत्वात इत्यादिस्थलीयोबोधः निरुक्तानजन्यकृत्युपस्थित्यनन्तरत्वात्।

रमा

कार्यतावच्छेदकाक्रांतत्वं न भवतीति न व्यभिचारः इति तदनंतरशाब्दबोधे इति
वृत्ताननन्यकृत्युपस्थित्यनंतरशाब्दबोधे इति वृत्ताननन्यकृत्युपस्थितिकार्यतावच्छे
दकानाक्रांतचैत्रो नानानातीत्यादिवाक्यसहकृतपदार्थोपस्थितियोग्यताज्ञाना
दिरूपस्वसामग्रीवशात्संपन्ने योग्यघटासंसर्गकचैत्रविशेष्यकत्वानप्रकारकज्ञा
नवांश्चैत्र इति शाब्दबोधे तादृशकारणबाधस्य तथात्वं तरवृत्तिवृत्ताननन्योपस्थि
तिरूपकारणबाधस्य अकिंचित्करत्वादिति कारणतावच्छेदकावच्छिन्नाभा
वो हि येमसाधारणकारणरीत्या कार्यतावच्छेदकावच्छिन्नाभावे नियामकः
प्रकृते च निवृत्ताननन्यकृत्युपस्थितिः कारणमेव न भवति न वा निवृत्तस्वतान
कृत्युपस्थित्यनंतरत्वात् ज्ञानवांश्चैत्र इति शाब्दबोधः कार्यतावच्छेदकाक्रांतो॥
पि इति निवृत्ताननन्यकृत्युपस्थित्यभावस्य ज्ञानवांश्चैत्र इत्याकारकशाब्दबोधा
भावनियामकत्वादित्यर्थः तथा चाख्यातेऽनिरर्थकमिति भावः ज्ञानवांश्चैत्र इति
शाब्दसामग्रीमुपपादयति तादृशानुपूर्वीघटकत्वाख्याताननन्यवृत्तानाप्युपस्थितीति

चैत्रोज्ञानातीत्यानुरूपींचटकत्ताधात्वित्यर्थः नवीनमत्याश्रयतासंसर्गतावादिप्राची
नमतेशंकते नचैतदित्यादिवाच्यमित्यंतेन प्राचीनमतेआश्रयतासंसर्गकयो।
ग्यताज्ञानकारणताधिकाप्राचीनमते आश्रयतासंसर्गकशाब्दाभावात्ना
श्रयतासंसर्गरूपायोग्यताज्ञानकारणतेतिलाघवमितिभावः आश्रयाश्रयता
संसर्गवादीस्वमतेगौरवमाहरतिआश्रयतासंबंधेनज्ञानविशिष्टचैत्रादिता
त्पर्यकादितिसर्वनाम्नः सरत्येवंरूपान्नतदादेः एवंसंकेतितशब्दान्तराद्वायदा
मयाचदहरतिवक्तव्यंतदात्वयाश्रयतासंबंधेज्ञानवांश्चैत्रोवोधयस्वइतिवक्त्राय
दासंकेतग्रहस्तदातादृशचदादिशब्दान्न तदादिसर्वनामभिन्नाद्धेत्यर्थ
तादृशसंबंधेनआश्रयतासंबंधेन ज्ञानादिप्रकारकचैत्रादिविशेष्यकशा
ब्दवोधस्यसंस्त्वयासंकेतितकचदरस्त्वत्रचप्रथमैकवचनोपस्थाप्यैकत्वसंस
र्गवोधस्यापकोज्ञानवानित्याकारकस्यसर्वमतसिद्धावपीत्यनेनाश्रयता
संसर्गकयोग्यताज्ञानकारणतासर्वमतासिद्धत्वान्नप्राचीनमतेः ऽपिकेतिस

विनेश्वत्तिनगौरवमितिभावः अथेत्यादौ आश्रयतासंसर्गमते भूयोपिगौरवमाद्य
दयति तादृशशाब्दबोधं प्रति तादृशशाब्दबोधे तादृशतात्पर्यकसर्वनामसंकेति
कयदादिशब्दानां तत्तद्धर्मत्वानवच्छिन्नं प्रति शाब्दबोधे प्रथमाद्युपस्थापितैकत्व
रूपपदार्थान्तरविषयत्वनियमेनेत्यर्थः अन्यथापदार्थान्तराभाने पदार्थयोः संसर्ग
बोधरूपशाब्दबोधपदवाच्यता नस्यात्किंतु नाममात्रोपस्थितिपदाभिधेयः
स्यात्तथाचतन्निष्ठितयोग्यतात्वानवच्छिन्नमस्ति सर्वनाम्नः यदश्रुतिसंकेतिकशब्दस्य
स्येयोऽर्थः आश्रयतासंबन्धे न तत्तानवच्छिन्नं स्यादित्यर्थः तदपेक्षया पदार्थान्तरे सति इति चेद
इति प्रथमापदार्थैकत्वतन्निष्ठितत्तद्विषयकं यत्तद्योग्यतात्वानवच्छिन्नं वानेकश्रे
यतियोग्यतात्वानं तस्य न यत्र सर्वोक्तसर्वनामसंकेतिकपदजन्यबोधे हेतुतायां
आवश्यकत्वात्सर्वमतसिद्धत्वादित्यर्थः यद्वा तन्निष्ठितस्यैकत्वविशिष्टस्य
तानवच्छेदकस्य तद्योग्यतात्वानं तस्येत्यर्थः ज्ञानादिविशिष्टचैत्रादिमात्रविषय
कयोग्यतात्वानस्य ज्ञानादिविशिष्टचैत्रादिविषयकशाब्दबोधहेतुतायाः कुत्राप्य

ख॰ ८

ल्कमत्वादिनिमूले तथा च चैत्रो ज्ञानानीत्यत्राश्रयतासंबंधेन ज्ञानत्वावच्छिन्नप्रतिशा
द्दबोधे प्रतिज्ञानादिविशिष्टचैत्रादिमात्रविषयकयोग्यताज्ञानं हेतुरिति संसर्ग
तावादिप्राचीनमतपक्षगौरवमित्यर्थः क्वापि सर्वनामसंकेतशब्दस्थले चै
त्रो ज्ञानानीत्यादावपि चेत्यर्थः आश्रयतासंसर्गवादी गौरवसाम्यमाह भवन्म
ग तेपीति आश्रयताप्रकारकबोधवादीनैमतेपि तथाविधयोग्यताज्ञानहेतु
तायाः ज्ञानाश्रयत्वप्रकारकचैत्रादिविशेष्यकयोग्यताज्ञानहेतुतायाः नवीनम
ते आधिक्यादित्यर्थः तथा चाश्रयतासंबंधेन ज्ञानत्वावच्छिन्नबोधे नवीनानं
गीकृते आश्रयतासंबंधेन ज्ञानत्वावच्छिन्नप्रतियोग्यताज्ञानकारणतासंसर्गतावा
दिप्राचीनमतेधिका यथा तथा ज्ञानाश्रयत्वावच्छिन्नप्रतिबोधे प्राचीनानंगीकृते
ज्ञानाश्रयत्वावच्छिन्नप्रतियोग्यताज्ञानकारणतानवीनस्याधिकेत्युभयमतसा
म्यमिति आश्रयतासंसर्गमते लाघवमाह आश्रयतासंसर्गतानीयकारणतावच्छेद
कस्यानित्यस्य च लघुशरीरत्वपारत्येनान्वयः संसर्गतामते योग्यताज्ञाने ज्ञाने।

चैत्रस्याश्रयताः इति द्वयोर्विषयाः प्रकारतामते तु योग्यताज्ञाने ज्ञानेऽस्याश्रयता
स्याश्रयतायाः स्वरूपसंबंधविशेषरूपेति च तत्त्वाऽत्रो विषयाः इति नवीनमते गौरवमि
त्यर्थः आश्रयतासंसर्गकेज्ञाने शाब्दबोधः तदीयानतिरूपितायाकारणता
तदवच्छेदकस्याश्रयतासंसर्गेण ज्ञानवैशिष्ट्यस्तत्प्रकारकशाब्दनिरूपिताश्र
यतासंसर्गकेज्ञानप्रकारकचैत्रविशेष्यकज्ञानवैशिष्ट्यस्तत्प्रकारकयोग्यता
ज्ञानत्वस्येत्यर्थः तृतीयसंसर्गविषयताघटिततत्प्रकारकज्ञानकारणताव
च्छेदकापेक्षया तृतीयः आश्रयतीयः ज्ञानाश्रयतानिरूपितः यः संसर्गः
स्वरूपसंसर्गः तन्निष्ठासंसर्गकीविषयताघटिततत्प्रकारकज्ञानका
रणतावच्छेदके ज्ञानाश्रयताप्रकारकचैत्रविशेष्यकशाब्दनिष्ठकार्यतानि
रूपितायाः ज्ञानाश्रयताप्रकारकज्ञानाश्रयतीयस्वरूपसंसर्गकचैत्रादिवि
शेष्यकयोग्यताज्ञाननिष्ठकारणताश्रयावच्छेदके ज्ञानाश्रयत्ववैशिष्ट्यस्यता
कारकशाब्दबोधसमानाकारसंशयनिश्चयसाधारणयोग्यताज्ञानत्वेन ३

बुं.
८१

तात्पर्यधीयत्वरूपसंबंधेन बाधितत्वाद्रूपभूतमित्येतदपेक्षया शाब्दबोधोपयोगितानां
ननिष्ठकारणतावच्छेदकं लघुभूतमित्यर्थः तात्पर्यतात्पर्यकत्वनावादिनवी
नः पुनः शंकते ननु तात्पर्यत्वेनैवात्मसमभिव्याहृतानां ज्ञानस्य शक्तिभ्रमः
स्वारसिकलक्षणाग्रहो वा तत्र तात्पर्यतात्पर्यकारकशाब्दस्योभयमतसिद्ध
तया तत्र तादृशयोग्यतातात्पर्यदेतत्त्वमुभयमतसिद्धमेवेति वाच्यमिति मूले
तत्र शक्तिभ्रमस्वारसिकलक्षणाग्रहान्यतरस्थले तादृशयोग्यताज्ञानहेतुत्वे
तात्पर्यत्वप्रकारकयोग्यताज्ञाननिष्ठहेतुत्वे आश्रयतासंसर्गवादिप्राची
नः स्वपक्षसमाधत्ते ननु व्याश्रयतात्पर्यप्रकारकस्यानुभूयमानत्वादिति
चेदिति तत्र आश्रयत्वात्मनापत्वे शक्तिभ्रमस्थले स्वारसिकलक्षणाग्रहस्थ
लेपि तात्पर्यत्ववैशिष्ट्यावगाहि शाब्दबोधोपि न स्वीक्रियते किं तु आश्रयता
संसर्गेण तात्पर्यवैशिष्ट्यावगाहिशाब्दबोधः स्वीक्रियते तत्राप्यमाशयः यथाश्रो ८१
दनेपचतीत्यत्रकस्यचिन्मते विभक्त्यर्थोपि कर्मत्वं संसर्गोपवकर्मतासंबंधेन

ओदनवान्पाक इति बोधस्वीकारात्तन्नत्वनिरूपकतासंबंधेन ओदनवान्पाक इति
बोधः तथा चैत्रः पचतीत्यत्र कस्यचिन्मते तानवान्पुरुष इति बोधः षष्ठ्यर्थोपि स्व
त्वसंसर्गतयैव भासते न तत्स्वत्ववान्पुरुष इति बोधः तथा नानातीत्यत्राख्याता
र्थोप्याश्रयत्वं संसर्ग एवेति आश्रयत्वं संसर्गत्वे मणिकारसंमतिं दर्शयति एतदभि
प्रायेणैव नानातीत्यादावाख्यातस्य निरर्थकतां मणिकार उररीचकारेति मूले य
था आश्रयत्वं संसर्गतयैव भासते तेन हि आश्रयत्वे आख्यातस्य लक्षणास्वीकारोपि व्य
र्थ एवेत्यभिप्रायेणैव नानातीत्यादावाख्याते मणिकारैरुक्तमित्यर्थः आश्रय
त्वप्रकारकबोधमुपपादयितुं शिरोमणिमतमाह तत्र आश्रयत्वे निरूढलक्षणामि
ति तत्र धातुसमभिव्याहृताख्याते निरूढलक्षणां न तु स्वारसिकलक्षणां आश्रय
त्वे तथा धातुसमभिव्याहृताख्यातस्य शक्तिभ्रमकाले स्वारसिकलक्षणाग्रहकाले
वा सर्वानुभवसिद्धं तादृशाश्रयत्वप्रकारकं चैत्रविशेष्यकबोधमपि स्वप्रोक्तिबलाख्य
मात्रानुभवसिद्धधात्वर्थतानप्रकारकचैत्रविशेष्यकबोधोपपादनेपि तत्र धातो

रेवाज्ञातस्यज्ञानानाश्रयत्वेशक्तिभ्रमः स्वारसिकलक्षणाग्रहोवातत्रशक्तिभ्रमकाले
स्वारसिकलक्षणाग्रहकालेवाचैत्राद्यंशेविशेष्यीभूते यात्वर्थैकदेशस्यज्ञानादेर्ज्ञा
नाश्रयत्वरूपत्वाधात्वलभ्यार्थैकदेशस्यज्ञानस्यान्यथानुपपत्त्या॰ प्रकारविशेषण
तयान्वितस्यान्यत्रविशेषणत्वेनान्वयायोगादितिनियमात् नज्ञानाश्रयत्वेविशेषणत
यान्वितस्यज्ञानस्यपुनश्चैत्रेविशेषणतयाऽन्वयोनसंभवतीतिसर्वथाज्ञानवांश्चैत्र
इतिशाब्दबोधासंभवान्नाणीकृद्भिरपीदृशस्थलेज्ञानाश्रयत्ववांश्चैत्रइत्याकारक
बोधः स्वीकरणीयइत्यर्थः उपसंहरति तथाचतचेति नचज्ञाधातोर्ज्ञानाश्रयत्वेश
क्तिभ्रमस्वारसिकलक्षणाग्रहकालिकज्ञानानातीतिप्रयोगस्थलेज्ञायमानेज्ञाना॰
श्रयताप्रकारकशाब्दबोधे तत्प्रकारकज्ञानाश्रयत्वप्रकारकयोग्यताज्ञानहेतुतायाः
क्लृप्ततयानाधिक्यंकिन्तुनवीनैरङ्गीकृतेज्ञानाश्रयतासंसर्गकशाब्दबोधेज्ञानाश्रयता
संसर्गकयोग्यताज्ञानहेतुताकल्पनमाधिकमेवमाणीकृन्मतेइत्यर्थः शिरोम॰
णिमतेगौरवमाशंकतेनचदीधितिकृन्मतेइति तादृशेति ज्ञाश्रयतासंसर्गक

योग्यताज्ञानहेतुत्वाकल्पनलाघवसंभवेपीत्यर्थः ज्ञानानीत्याद्यानुपूर्वीरूपाकांक्षा
ज्ञानघटितायाशाब्दसामग्र्याएवंतथात्वशक्तिजन्यज्ञानोपस्थितिघटिताया योग्यता
ज्ञानाश्रयत्वप्रकारकशाब्दस्यसामग्रीत्वस्या: घटादिभिन्नविषयकप्रत्यक्षादिकंप्र
तिप्रतिबंधकतायामव्याप्तत्वंनन्वाश्रयत्वोक्तौनिनिवेशाद्गौरवंप्राचीनमतेतत्रा स्य
ख्यातस्यानर्थक्यान्नगौरवमित्यर्थः समाधत्तेभवन्मतेपीति भवन्मतेपिमणि
कृन्मतेपिज्ञानाश्रयत्वाभाववांश्चैत्रस्संदण्डइत्यादिविशिष्टवैशिष्ट्यावगाहिप्रत्य
क्षे ज्ञानाश्रयत्वाभावविशिष्टेचैत्रेसंदण्डज्ञानवैशिष्ट्यावगाहिप्रत्यक्षेएकविशि
ष्टे परधर्मवैशिष्ट्यावगाहिप्रत्यक्षंप्रतिविशेष्यतावच्छेदकप्रकारकनिर्णयस्य
हेतुतयानवीनमतेज्ञानाभावातिचैत्रइत्यत्रज्ञानाश्रयत्ववांश्चैत्रइतिबोधात् शाब्दसा
मग्रीनेहशाब्दत्वदेप्रतिबंधकातथाहिशाब्दसामग्रीज्ञानाश्रयत्वाभाववांश्चैत्रइ
तियोग्यतादभावघटितायोग्यताज्ञानादिरूपाप्रत्यक्षसामग्रीतत्रज्ञानाश्रय
त्वाभाववांश्चैत्रइतिविशेष्यतावच्छेदकप्रकारकनिश्चयघटिता: योग्यतादस्या

सं॰
८५

वह्न्योर्युगपदवस्थानासंभवेन शाब्दसामग्रीकाले प्रत्यक्षसामग्र्येव नास्तीति
सामग्र्यभावादेव ज्ञानानाश्रयत्वाभाववांश्चैत्रः संदेह इति प्रत्यक्षानुत्पत्तेरसत्यां ते
दृश प्रत्यक्षे शाब्दसामग्री प्रतिबंधिकेति नवीनमते लाघवम् प्राचीनमते
तु ज्ञानवानिति ज्ञानप्रकारकाश्रयतासंसर्गकचैत्रविशेष्यकयोग्यताज्ञा
नघटिता शाब्दसामग्री प्रत्यक्षसामग्री तु ज्ञानानाश्रयत्वाभावप्रकारकचैत्रवि
शेष्यकयोग्यताज्ञानघटिता शाब्दसामग्री प्रत्यक्षसामग्री तु ज्ञानानाश्रयत्वा
भावप्रकारकचैत्रविशेष्यकविशेष्यतावच्छेदकप्रकारकनिर्णयघटिता
तत्र च ज्ञानप्रकारकमाश्रयतासंसर्गकं चैत्रविशेष्यकं ज्ञानं कर्त्तं ज्ञानानाश्र
यत्वाभावप्रकारकं चैत्रविशेष्यकं ज्ञानेन न विरुध्यते हि ग्राह्याभावानवगाहि
त्वात् अतः सामग्र्योर्यौगपद्यसंभवान् शाब्दसामग्र्याः प्रत्यक्षे प्रतिब
न्धकत्वं कल्पनीयमिति गौरवमित्याहुः ज्ञानानाति चैत्रस्य प्रत्यक्षानुत्पत्तिस्तावत् न घ ८५
टितत्वाधानजन्यताज्ञानोपस्थितिघटित शाब्दसामग्र्याः प्रतिबंधकताधिके

नैगौरवादितिमूले ज्ञानानीति चैत्रस्याज्ञानसृष्टीत्तानन्वचदित्तायाः तथात्तायात
त्तत्वत्तानोपस्थितिचदित्तायाः ज्ञानप्रकारकाप्रामाण्यत्तासंसर्गकचैत्रादिविशे
ष्यकशाब्दसामग्र्यायोग्यत्ताज्ञानादिरूपायाः प्रतिबंधकत्ताधिक्येनगौरवा
दित्यर्थः नवीनमतेलाघवमाह मन्मतेइति दीधितिकृन्मतेइत्यर्थः ज्ञानाप्र
यत्ववांश्छेयइति शाब्दबोधविरोधीयो ज्ञानाप्रयत्वाभाववत्तानिश्चयोवि
शिष्टवैशिष्ट्यमितिप्रत्यहेविशेष्यत्तावच्छेदकप्रकारकनिर्णयत्वेनकारणी
भूतस्तद्विदित्तया तथाविशिष्टवैशिष्ट्यबोधसामग्र्याः ज्ञानाप्रयत्वाभाववां
श्छेयः संदेहस्याकारकाविशिष्टवैशिष्ट्यप्रत्यक्षसामग्र्याः ज्ञाहशसामग्र्यासमे
ज्ञानाप्रयत्ववांश्छेयइति शाब्दबोधस्यज्ञानाप्रयत्वाभाववांश्छेयइतियोबाध
स्तदभाववद्विदित्तयोग्यत्ताकांक्षाज्ञानादिरूपशाब्दसामग्र्यासमेयुगपद्वस्था
नासंभवेन ज्ञानाप्रयत्वाभाववांश्छेयः संदेहः इतिप्रत्यहेज्ञानाप्रयत्वाभा
ववांश्छेयइतिविशेष्यत्तावच्छेदकप्रकारकनिर्णयचदित्तासामग्रीविशेष्य

व्यु॰
८६

तावच्छेदकतानाश्रयत्वाभाववांश्चैत्र इति निश्चयपवत्तानाश्रयत्ववांश्चैत्र इति शा
ब्दबोधबाधः ईदृशबाधाभावः शाब्दसामग्री तथा च बाधतदभावयोर्युगपदव
स्थानासंभवेन शाब्दसामग्रीकाले प्रत्यक्षसामग्र्याभावादेव ईदृशप्रत्यक्षानु
त्पत्तौ शाब्दसामग्र्याः प्रतिबंधकत्वकल्पनाविरहादित्यर्थः शेषदर्शितदिशा
वसेयमिति यद्यपि प्राचीनमतेपि तानाभाववांश्चैत्रः नेदृशनिर्विशिष्टवैशि
ष्ट्यप्रत्यये तानवांश्चैत्र इति शाब्दबोधसामग्र्याः योग्यताज्ञानादिरूपायाः ता
दृशप्रत्यये विशेष्यतावच्छेदकप्रकारकानिर्णयविधयाकारतास्यताना
भाववांश्चैत्र इति निर्णयस्य तानवांश्चैत्र इति शाब्दबोधे बाधतया तादृशबा
धाभावघटितायाः प्रतिबंधकत्वेन कल्पने बाधतदभावयोर्युगपदवा
स्थानासंभवेन बाधाभावघटितशाब्दसामग्रीकाले विशेष्यतावच्छेदक
तानाभाववत्ताप्रकारकनिश्चयरूपप्रत्यक्षकारणाभावादेव प्रत्यक्षा ८६
नुत्पत्तौ शाब्दसामग्र्याः प्रतिबंधकत्वाभावादिति लाघवं संभवति नवीन

मृते तत्तानाभाववांश्चैत्रः इति प्रत्यक्षसामग्रीतानाश्रयत्ववांश्चैत्रः शाब्दसामग्र्याः
यौगपद्यसंभवात् तादृशप्रत्यक्षे शाब्दसामग्री प्रतिबंधिका न तथा नवीनमते गौरवमिति
तथापि तत्तानाभाववदाश्रयत्वं प्रमेयमिति न्याश्रयत्वे तत्तानाभाववदिति विशेष्यता
वच्छेदकप्रकारकनिर्णयो हेतुः स च निर्णयः तत्तानाश्रयत्ववानिति शाब्दस्य बाधस्त
दभाववद्धदिता शाब्दसामग्रीति बाधतदभावयोर्यौगपद्यासंभवात् शाब्दसामग्री
काले प्रत्यक्षसामग्र्यभावादेव तत्तानाभाववदाश्रयत्वं प्रमेयमिति प्रत्यक्षत्तानुत्पत्तो
शाब्दसामग्र्याः प्रत्यक्षे प्रतिप्रतिबंधकत्वाभावान्नवीनमते लाघवं प्राचीनम
ते न्याश्रयत्वे तत्तानाभाववदिति निश्चयचद्धदिता प्रत्यक्षसामग्रीतानवानिति शा
ब्दस्य सामग्री न्याश्रयत्वे तत्तानाभाववदिति निश्चयाभावद्धदिता न भवतीति सा
मग्र्योर्यौगपद्यसंभवात् शाब्दसामग्री प्रत्यक्षे प्रतिबंधिकेति गौरवं प्राचीनमते
पीत्यमघमतसाम्ये पि तत्तानत्ताश्रयत्वाभाववांश्चैत्रः संदेहइत्यादिविशिष्टबोधे
स्यावगाहिप्रत्यक्षे नानानिचैत्रत्वायोग्यानुपूर्वीज्ञानं च दितन्तायात त्वन्यत्ताको

श्रु
८१

पश्यतिचरितसामग्र्याः प्रतिबंधकत्वाधिक्येनप्राचीनमतेपूर्वोक्तंगौरवमाधिक्यमिति
भावः शंकतेयद्येवंरीत्येति नानातीत्यादावाख्यातार्थाश्रयत्वप्रकारकशाब्दबो
धप्रकारमुपपादयति भूतलेनघटइत्यादौघटादिपदस्यघटप्रतियोगिकाद्येलक्ष
णांस्वीकृत्यतत्रभूतलेनघटइतिवाक्येघटप्रतियोगिकाभावोभूतलवृत्तिरिति
प्रतियोगितात्वप्रकारकशाब्दएवसमुचितः तथाचनामार्थयोर्घटप्रतियोगिक
स्यअभावस्यचअभेदान्वयएवइतिनिपातातिरिक्तत्वविशेषणंनामनामार्थयो
रभेदान्वयइतिव्युत्पत्तौनदेयमेवंघटपदोत्तरंप्रथमायाएववाप्रतियोगितायो
लक्षणातदापिघटस्यप्रतियोगित्वेप्रथमार्थेतस्यचाभेदान्वयइतिनामार्थयोर्वि
भक्त्यर्थयोरेवान्वयस्तदापिनिपातातिरिक्तत्वविशेषणंनामार्थयोरितिव्यु
त्पत्तौव्यर्थंइतिनवीनस्यशंका प्राचीनमतेप्रतियोगितासंबंधेनघटस्यनञ
र्थेःभावेभेदान्वयः सचनामार्थयोर्नसंभवतीतिउक्तव्युत्पत्तौनिपातातिरिक्तत्व
विशेषणंसार्थकमितिभावः तथाचनञिप्रतियोगितात्वप्रकारकशाब्दोपि

८१

कारेमति तथाविधसमभिव्याहारज्ञानघटितसामग्र्याः भूतलेन घटइत्यादिसमभि
व्याहारज्ञानघटितशाब्दबोधसामग्र्याः घटप्रतियोगिकत्वाभाववत्त्वानभावः प्रमे
यः इत्यादिविशिष्टवैशिष्ट्यप्रत्यक्षे प्रतिबंधकत्वाकल्पनेन लाघवादिति
यद्वाभावः घटप्रतियोगिकत्वाभाववानिति विशेष्यतावच्छेदकप्रकारक
निर्णयः प्रत्यक्षकारणं समवघटप्रतियोगिताकत्ववानभाव इति शाब्दबो
धे बाधस्तु अभाववृत्तिता च योगपत्ताज्ञानादिरूपा शाब्दसामग्री तथा च बाधन
द्भाववोरयौगपद्यात् शाब्दसामग्रीकाले प्रत्यक्षसामग्र्यभावादेव प्रत्यक्षानु
त्पत्तेः न शाब्दसामग्रीप्रत्यक्षे प्रतिबंधिका इति नवीनमते लाघवादित्यर्थः प्राची
नमते तु प्रतियोगिताः संबंधेन घटवानभाव इति शाब्दबोधः तत्सामग्रीः त्वक्प्रत्य
क्षसामग्र्योः मेलनसंभवात् शाब्दसामग्री उक्तप्रत्यक्षे प्रतिबंधिकेति गौरवमिति
भावः अथ नामार्थयोरिति निषेधतौ निपातातिरिक्तत्वविशेषणस्याकल्पा
यदृ वै पदितिमते इष्टत्वात् तथा न घटवानिति भूतलेन घटइत्यादावितिरिक्ताभावो भूत

अ॰
८८

लवृत्तिरितिघटाभावधर्मिकभूतलवृत्तित्वप्रकारकशाब्दानुभवे तात्पर्यग्रहप्रका
रणबलात् नघटोभूतलवृत्तित्वाभाववानितिघटविशेष्यकभूतलवृत्तित्वप्रका
रकशाब्दानुभववत्तात्पर्यग्रहप्रकारणबलात् नघटोभूतलवृत्तित्वाभाववानि
तिघटविशेष्यकभूतलवृत्तित्वाभावप्रकारकशाब्दानुभवोपीत्यर्थः अन्या
थाघटादिविशेष्यकभूतलादिवृत्तित्वाभावप्रकारकशाब्दबोधानंगीकारेणा
दृशवाक्यजन्यस्य भूतले नघट इत्यादिवाक्यजन्यस्य अप्रामाण्यज्ञानविषयी
भूतबोधे न प्रतिबंधकत्वप्रामाण्यज्ञानानास्कंदितेत्युक्ते एवं यदिह मते सिद्धस्य
घटाभावोभूतलवृत्तिरितिबोधस्य भूतले घट इत्यादिवाक्यजन्यघटादिविशे
ष्यकभूतलादिवृत्तित्वप्रकारकबोधं प्रति सर्वानुभवसिद्धविरोधितानुपपत्ते
रित्यर्थः नहि घटाभावधर्मिकं भूतलवृत्तित्वप्रकारकं ज्ञानं कदं घटधर्मिके
भूतलवृत्तित्वप्रकारकं ज्ञाने विरुणद्धि ग्राह्याभावानवगाहित्वात् किं न घटो भू
तलवृत्तिरितिज्ञाने घटो न भूतलवृत्तिरित्येवज्ञाने प्रतिबंधके ग्राह्याभावगाहि

व

त्वादिति भूतलेन घटः इति वाक्यात् घटधर्मिकभूतलवृत्तित्वाभावप्रकारकबोधोऽव
श्यमंगीकरणीयः इति भावः प्रतियोग्यभावान्वयौ तुल्ययोगक्षेमाविति नियमनिर्वा
हस्यानन्नञ्पदं विनेति यादृशसमभिव्याहारात् भूतले घटः इत्याकांक्षावशा
त्तन्नञ्पदं विना घटधर्मिणि घटे यस्य भूतलवृत्तित्वस्य विशेषणतया भानं भवति
तन्नञ्सत्त्वे तादृशसमभिव्याहारस्थले भूतले न घटः इति समभिव्याहारस्थले तत्र
तस्मिन् घटरूपे धर्मिणि तदभावो भूतलवृत्तित्वाभावः प्रतीयते इत्यनुभ
वापलापप्रसंगादित्यर्थः एवं च न भूतले घटः इति वाक्यात् घटो भूतलवृत्तित्वा
भाववानिति बोधांगीकारे च सम्मति नञर्थाभावेऽनुयोगितारूपभेदसंबंधेन घ
टो भूतलवृत्तित्वाभाववानित्यन्वयबोधो न संभवति नामार्थयोरभेदान्वयबो
धनियमादिति तादृशबोधोपपत्तये नामार्थयोरित्यादिसूत्रस्य शरीरे निपाताति
रिक्तत्वं विशेषणमावश्यकमित्यर्थः निपातातिरिक्तयोर्नाम्नोस्तदर्थयो
रभेदान्वयः प्रकृते च निपातत्वात् नञर्थाभावेऽनुयोगितारूपभेदसंबंधेन घटा

न्वयो न विरुद्ध इति भावः उक्तव्युत्पत्तौ निपातातिरिक्तत्वप्रवेशे प्रयुक्तं तत्र माह एवं
पूर्वोक्तन्नलत्वरीत्या न पचति चैत्रः न चैत्रस्य पचनमित्यादौ पाककृति चैत्रस्वत्वयोर
भावस्य नञर्थस्य चैत्रपचनादावन्वयोगितायां भेदसंबंधेनान्वयबोधोपपत्तये तन्न
निपातातिरिक्तत्वं विशेषणं नामार्थयोरिति व्युत्पत्तावावश्यकं एवं घटो न पट
इत्यादौ घटे नञ्योगितया पटे प्रतियोगितया घटाद्युभयविधभेदसंबंधेनान्वयबो
धोपपत्तये चैतदावश्यकं निपातातिरिक्तत्वविशेषणमावश्यकमित्यर्थः पुनः
शंकते न चोक्तस्थलेषु इति भूतले न घटः न पचति चैत्रः न चैत्रस्य पचनं च घटो
न पटः इत्यादिषु भूतलं घटत्वाभाववान् घटः पाककृत्यभाववांश्चैत्रः चैत्र
स्वत्वाभाववत्पचनं पटप्रतियोगिकाभाववान् घट इति शाब्दबोधसंभवान् ना
म्नोः भाववतिलक्षणायाः भाववत्तासमनन्वयोगिनोः भेदान्वयबोधोपपत्तये त
तेषु स्थलेषु पदार्थेन नञ्भेदान्वयोपपादनेन उक्तव्युत्पत्तौ निपातातिरिक्तत्वं विशे
षणमफलं स्यादित्यर्थः समाधत्ते तथा सति सर्वत्राभाववत्त्वेनैव नञर्थत्व

यामुख्यार्थपरनञोरुल्लेभत्वापत्तेरितिमूलं तथासति अभाववत्तिनञोला
क्षणिकत्वेसति सर्वत्रघटोनपटः अपटोघटः भूतलेनघटः अघटंभूतलमिति
व्याससमासस्थलेसर्वत्रैवत्वर्थः अभाववत्तपवनञर्थेनयामुख्यार्थपरनञयोरुल्ले
भत्वापत्तेरिति अनेनतानामभावानांशक्ततावच्छेदकत्वेगौरवादखण्डोपाधिरूप
मभावत्वंशक्ततावच्छेदकंलघुभूतमपिच अभावरूपमुख्यार्थकनञःप्रयोगादर्शना
दभावेशक्तेरसिद्धेःशक्यसंबन्धरूपालक्षणापिनसंभवतीतिनिभूतलेनघटः वैयोन
त्यंतोनियातिरिक्तत्वविशेषणमावश्यकमितिभावः ननुघटोनेत्यनयोग्यसमभि
व्याहृतनञपदाभावपरत्वंसंभवतीत्यतअभावस्येति ननुमन्यतेतत्तापमानस्याभा
ववत्ताग्रहस्यप्रतिबन्धेतद्भूतानांनेत्वभावमुख्यविशेष्यकशाब्दबोधस्याविरोधित्वे
नअभावमुख्यविशेष्यकशाब्दसामग्र्याप्रतिबंधकत्वकल्पनेलक्षणानैयाकत्वे
राधिकमित्याशंक्याह कल्पनाधिक्याविरहेणेति तथाचानिहर्मित्वावच्छेदकाभा
वविदेरधिकृतयाप्यविरोधित्वयासामान्यादित्याशयः भेदसंसर्गकनञर्थस्य कारका।

मु.
९.

योग्यताज्ञानस्य हेतुत्वकल्पनमधिकमेवेत्यत आह अभाववत्त्व इति अविरोधितायाः प्र
तिबन्धकमप्रसक्तमित्यविरोधितापर्यन्तमुपपादयति लाघवादिति ग्राह्याभाववन्नि
श्चयस्यैव तन्निभूतले घटः इत्यत्र भूतलवृत्तिघटः इति बोधात्तत्प्राक् भूतलवृत्तित्वेन घटाभावो
भूतलवृत्तित्वाभाववत्त्वनिर्णयस्यैव यदा भूतलवृत्तित्वाभाँ निति भूतलवृत्तित्वाभाव ददा
प्रकारकघटविशेष्यकनिर्णयस्यैव न तु भूतलवृत्तित्वाभाव प्रकारकाभेदसंसर्गा
कघटविशेष्यबोधस्येति भूतले न घट इत्यादिवाक्यात् भूतलवृत्तित्वाभावप्रका
रकघटविशेष्यकबोधप्रयोगीकर्तृत्वमुद्दिनोत्तत्वभाववन्निलक्षणापीति नतोऽभा
वेशाकिः सिद्धेतिभावः नीलोघट इत्यादौ विशेषणविभक्तेरभेदार्थकत्वमतेऽपि
पदपञ्चकरीत्या लाघवं संभवतीति यद्यारोजस्वत्वाभाववान्पुरुषः स्तुद्र इति प्रत्य
ले घतिघष्ठीस्वत्वार्थिकेति नव्यमतेराजः पुरुष इति शाब्दसामग्र्याः प्रतिबन्धकत्वे
न कल्प्यते राजस्वत्वाभाववान् पुरुष इति विशेष्यतावच्छेदकप्रकारकानिर्णयः
प्रत्यहे कारणत्वं तथा च निर्णयः शाब्दबोधे बाधः तादृशबाधाभावः शाब्दबोधेका ५.

रणे तया च बाधतदभावयोर्युगपदवस्थानासंभवात्सामग्र्योर्मेलनं न संभवतीति न
शाब्दसामग्री प्रत्यक्षे प्रतिबंधिका तया नीलाभेदाभाववान्घटः प्रमेय इति प्रत्यक्षे
पि नीलाभेदाभाववान्घट इति विशेष्यतावच्छेदकप्रकारकनिर्णयः कारणम
एवच नीलो घट इति वाक्यजन्ये नीलाभेदवान्घट इति शाब्दबोधे बाधः तस्य बा
धस्याभावः शाब्दबोधे कारणमिति प्रत्यक्षशाब्दसामग्र्योः बाधतदभाववद्घटि
तयोर्यौगपद्यासंभवात्तन्न शाब्दसामग्री प्रत्यक्षे प्रतिबंधिकेत्युक्तरित्यस्यार्थः ए
वं राज्ञः पुरुष इत्यत्र स्वत्वं संसर्गः षष्ठी निरर्थिका राजवान्पुरुष इति शाब्दधीः
षष्ठ्यंतराजपदसमभिव्याहारस्य नियामकत्वाच्च न राज्ञा पुरुष इत्यत्र स्वत्वसंसर्गक
राजवान्पुरुष इति बोधापत्तिः नवा नामार्थयोरभेदान्वयानुपपत्तिरिति वद
न्तः प्राचीनमते राजपदस्य राजसंबंधिनि स्वारसिकलक्षणाग्रहदशायां राजसंबं
धप्रकारकबोधस्यावश्यकत्वात्तथा च नीलो घट इत्यत्रापि विशेषणविभक्तिरभे
दबोधक तया षष्ठीवन्नामार्थिकेत्युक्तरीत्येत्यर्थः इष्टापत्त्या समाधत्ते तथापि नवादि

मु॰
९१

नोविरुद्धइतिदिगिति तथापिप्रतिवध्यप्रतिवंधकभावस्थलेउक्तरीत्यालाघवसंभ
वेपि तत्रप्रतिवंधकतालाघवलभ्येविशेषणविभक्त्यभेदार्थकत्वेनः अभेदसंस
र्गतावादीनामस्माकंयुक्तिबलात्तत्त्वसिद्धेर्नविरुद्धइतिभावः इतिव्युत्पत्तिवादे
नामाख्यातान्वयबोधविवरणं अथप्रत्ययार्थंनिरूपयितुमाह प्रत्ययाश्चेति तद्धिता
दीत्यादिनाक्यच्काम्यच्सनादिपरिग्रहः तत्रप्रथमार्थः प्रकृत्यर्थविशेषणविध
यान्वयिनीसंख्यैवेति तत्रसप्तविभक्तिमध्ये संख्यैवेत्येवकारेणसंख्यातिरिक्ता
र्थव्यवच्छेदः अन्यथातंडुलंपचतीत्यत्रद्वितीयार्थएकत्वंकर्मत्वंतत्रएकत्वविशि
ष्टतंडुलनिष्ठाकर्मताइतिबोधात्त यथाएकत्वंप्रकारएवनतुविशेष्यंतथासंख्या
तिरिक्तार्थस्वीकारेतस्यैवविशेष्यतयाभानंस्यात्तत्वेकत्वस्यघटइत्यत्रनीलादि
पदांतरासमभिव्याहारेघटवृत्तिएकत्वमित्येवानुभूयतेनत्वेकत्ववान्घटइतिभावः
घटवृत्तिएकत्वमितिबोधमुपपादयति अतएवेति अतएव संख्यामात्रस्यप्रथ
मार्थत्वादेव मात्रपदेनसंख्यातिरिक्तार्थव्यवच्छेदः अतिरिक्तार्थत्वेघटमित्यत्रे

९१

143

व्युत्पत्तिवाद
६१ पत्रक ॥ ल० अ० १२ पं० प्रं० पू

ह० ल०